ज्येष्ठमासः
वर्षम् – ६९
अष्टमोऽङ्कः
विक्रमाब्दः २०७६
युगाब्दः ५१२१
५ जून २०१९

ISSN 2249-698X

# भारती

## संस्कृत-मासपत्रिका

एकस्याः प्रतेः
१५/–
वार्षिक–शुल्कम्
१२०/–
आजीवनसदस्यता
१५००/–



मातृभूमेः प्रतिष्ठायै बद्धनिष्ठः पराक्रमी।
महाराणाप्रतापोऽयं प्रेरको भारतावनेः॥

## विषय-सूची

| क्र.सं. | विषयाः | निबन्धकाराः | पृष्ठ-संख्या |
|---|---|---|---|
| १ | मङ्गलाचरणम् | श्री प्यारेमोहनशर्मा | ३ |
| २ | मासावतरणम् | श्री प्यारेमोहनशर्मा | ३ |
| ३ | सम्पादकीयम् | श्री प्यारेमोहनशर्मा | ४ |
| ४ | राजकुमारी दर्दुरं वरयति | डॉ. हर्षदेवमाधवः | ५ |
| ५ | सूक्ति-सुधा | डॉ. प्रेमचन्द्र रांवका | ११ |
| ६ | देवर्षिवैभव-वन्दनम् | डॉ. शिवदत्तशर्मा चतुर्वेदः | १२ |
| ७ | आद्यशंकराचार्यस्य आत्मबोधग्रन्थे | युगल किशोर भारद्वाजः | १५ |
| ८ | विनायकसहस्रसिद्धयै | राजेन्द्र मोहन शर्मा | १६ |
| ९ | महाकवेर्बाणभट्टस्य चिन्तने कविः काव्यं च | गजेन्द्रकुमारः कांसोटिया | १८ |
| १० | ऐतिहासिकमहाकाव्यद्वयम्-रामायणं...... | गणेशनारायणस्वामी | २० |
| ११ | श्रीरामसा-स्तुतिः | आचार्य पं. नथमलशास्त्री दाधीचः | २२ |
| १२ | श्रीअजमल-भक्ति-गाथा ( काव्यम् ) | आचार्य पं. नथमलशास्त्री दाधीचः | २३ |
| १३ | पुस्तकसमीक्षा | म.म. देवर्षिकलानाथशास्त्री | २४ |
| १४ | संस्कृत समाचारः | डॉ. सुरेन्द्रकुमारशर्मा | २५ |
| १५ | अस्माकं गुरवः | वेणीमाधव गो. धर्माधिकारी | २६ |
| १६ | प्रेरकप्रसङ्गशतकम् | श्रीमती आराधना धर्माधिकारी | २७ |
| १७ | भारतभूम्याः विभूतयः | अविनाश शर्मा | २८ |
| १८ | नारी-स्तम्भः | डॉ. राजेश्वरी भट्टः | ३० |
| १९ | आयुर्वेद स्तम्भः | प्रो. बनवारीलालगौडः | ३२ |

### पाठकेभ्यो निवेदनम्

संस्कृतसुधियः पाठकाः निवेद्यन्ते यद् भारत्यां प्रकाशिताः शोधलेखाः, सामयिकनिबन्धाः, कविताः, कथाः, विनोदवार्ताः, लघुनाट्यकृत्यादयो भवद्भ्यः कथं रोचन्ते ? स्वविचारयुक्तपत्राणि निम्नलिखितसङ्केतोपरि संप्रेष्यानुगृह्णन्तु– **सम्पादक, 'भारती' संस्कृतमासिक, भारतीभवन, बी–15, न्यू कॉलोनी, जयपुर–302001**

दूरभाषः 0141–2379014, मो. 9783105699

**(धनादेश/चैक/ड्राफ्ट केवल ''भारती'' के नाम से ही भेजें– प्रबन्ध सम्पादक)**




।। श्रीशः ।।

ISSN2249-698X

# भारती

संस्कृत-मासपत्रिका





**प्रमुखसंरक्षकाः**
जगद्गुरवो निम्बार्कपीठाचार्याः स्व. श्रीराधासर्वेश्वरशरणदेवाचार्याः

**प्रमुखसंरक्षकाः**
स्व. जगद्गुरुशङ्कराचार्यस्वामिश्रीजयेन्द्रसरस्वतीमहाभागाः

**प्रेरणास्रोतः**
स्व. परमाचार्यः
श्रीचन्द्रशेखरेन्द्रसरस्वतीमहाभागः

संस्थापकौ
स्व. उमाकान्तकेशवआप्टे
( बाबा साहब आप्टे )
स्व. श्रीगिरिराजशास्त्री ( दादाभाई )

संरक्षकाः
स्वामी विश्वेशतीर्थः
स्वामी सत्यमित्रानन्दगिरिः
स्वामी रामभद्राचार्यः
आचार्यः अविचलदासः
स्वामी विद्यानन्दसरस्वती

प्रधानसम्पादकः
देवर्षिकलानाथशास्त्री

सम्पादकः
प्यारेमोहनशर्मा

प्रबन्धसम्पादकः
सुदामा शर्मा

सहसम्पादकौ
प्रो. सुरेन्द्रकुमारशर्मा
शिवशरणनाथत्रिपाठी

राजीव दाधीच
व्यवस्थापक

पृष्ठसंयोजनम्
श्याम प्रिन्टर्स, 22 गोदाम, जयपुरम्
rajeshksharma69@gmail.com - 01414001974


## मङ्गलाचरणम्

कश्मीरान्नातिदूरे हिमगिरिशिखरे देवगङ्गासमीपे।
पार्वत्या आग्रहेण प्रमुदितमनसा श्रावयामास गाथाम्।।
रम्ये स्थाने गुहायां हिममयवपुषा भ्राजमानं त्रिनेत्रम्।
गौरीशं पञ्चवक्त्रं सकलसुरवरैः पूज्यमानं नमामः।।

## मासावतरणम्

वाता धूलिभृताश्चलन्ति बहुशस्तप्ता रवेरुष्मणा,
सर्वाङ्गानि दहन्ति भानुकिरणैर्दीप्ता यथाऽङ्गारकाः।
संतप्ताः शरणं प्रयान्ति पशवश्छायां तरूणां घनाम्
ज्येष्ठे मासि सुखप्रदं सुमधुरं कूपोदकं शीतलम्।।


कार्यालयः
बी-15, भारतीभवनम्
न्यू कॉलोनी, जयपुरम् ( राज. )
ई-मेल sanskritbharti09@gmail.com

ज्येष्ठमासः
वर्षम् 69
वार्षिकशुल्कम् 120/-

विक्रमाब्दः 2076
जून, 2019
अङ्कः -8
पञ्चवार्षिकशुल्कम् 500/-
आजीवनसदस्यताशुल्कम् 1500/- रूप्यकाणि

सम्पादकीयम्

# संयमः आवश्यकः

...✍ पं. प्यारेमोहनशर्मा

एकः शब्दः सुप्रयुक्तः सम्यग् ज्ञातः स्वर्गे लोके च कामधुक् भवति। शब्दस्य माहात्म्यमत्यधिकं वर्तते। शब्देनैव सर्वाणि कार्याणि सिध्यन्ति। वाण्येका समलङ्करोति पुरुषं वाग् भूषणं भूषणम्। परन्तु सम्प्रति नेतारो यथा वदन्ति तेन तु ज्ञायते यद् भारतस्य प्रतिष्ठा संस्कृतिर्वा न जाने कुत्र विलुप्ता जाता। महाभारतयुद्धेऽपि कौरवा पाण्डवाश्च परस्परं युध्यन्तिस्म परन्तु त्वं चौरः त्व ञ्च गर्दभः इति तेऽमी न वदन्तिस्म। सूच्यग्रं नैव दास्यामि विना युद्धेन केशव इति वक्ता दुर्योधनोऽपि कुक्कुरेभ्यः न किमपि दास्यामीति न वदतिस्म। परन्तु सम्प्रति प्रधानमन्त्रीपदासीनो नरेन्द्रमोदी सदृशो नेताऽपि विरोधिदलं प्रति अनर्गलं भाषते। इतश्च कांग्रेसदलस्याध्यक्षः राहुलगान्धी महोदयो मोदी चौरः इति वदति। यद्यपि उच्चतमन्यायालये स्वकथनाय स क्षमां याचते। परन्तु सभासु मोदी चौरः इति घोषं जनैः कारयति। किं राजनैतिक-दलेषूच्चपदासीना नेतारः इत्थमेव वदिष्यन्ति?

स्मरन्तु सत्यं कदापि कस्मिन्नपि युगे कस्यामपि स्थितौ न परिवर्तते। उदाहरणाय लोकतान्त्रिके स्वस्थसमाजे स्वतन्त्रता समानता प्रभृतयः सन्दर्भा विद्यन्ते। वयमनुभवामो यथा यथा समयः परिवर्तते तथा तथा स्थापितजीवनमूल्याः पश्चाद् गामिनो जायन्ते। सम्प्रति आचरणसंहिता विलुप्ता जायते। यः कोऽपि सम्यक विचारं विनैव किमपि वदति समुचितमाचरणं न विदधाति तस्य प्रथमः प्रभावः तस्य स्वकीयसम्माने सामाजिकोपेक्षारूपेण पतति। स येषां मध्ये सदैवोपविशति सर्वतः प्रथमं तत्रैव तस्योपेक्षा जायते।

प्रश्नोऽयं यदस्माकमाचरणं व्यवहारश्च कैः वस्तुभिः प्रभावितो भवति। अस्माकम् आचरणं परिवारशिक्षा-सामाजिकसंस्कृतिभिः प्रभावितो जायते। आचरणस्य शुचिता व्यक्तिगतरूपेणास्मभ्यं शान्तिं प्रयच्छति। एतेन परिवारः समाजश्च प्रगतिपथेऽग्रेसरो जायते। लोकाः सर्वं जानन्ति। परन्तु किञ्चित् प्रसिद्धिं लब्ध्वा अथवा सफलता-प्राप्ति-समकालमेव सदाचरणं विस्मृत्य मर्यादां भङ्क्त्वा व्यवहरन्ति।

इत्थं प्रतीयते यदात्मानं परिचर्चाकेन्द्रे स्थापयितुं लोकानां ध्यानमात्मानं प्रति केन्द्रितं विधातुं ते तादृशीं कल्पनां कुर्वन्ति। दौर्भाग्यात् संचारसाधनानि अपि सदाचरण मुपेक्षन्ते। संचारसाधनानि उदण्डतां अनुशासनहीनतां अमर्यादितमाचरणमाधिकं महत्वं प्रयच्छन्ति। तदा शान्ताः सदाचारिणोऽपि तथा विधातुं समुत्सुकाः जायन्ते।

महात्मागान्धी आङ्ग्लानाममर्यादितं शासनमुच्छेतुमेव बहिष्कारस्य प्रयोगमकरोत्। अस्माकं समाजेऽपि वैदिकमाचरणमुच्छेतृणां बहिष्कारो विधीयतेस्म। अद्य आचारसंहिताया ये उल्लंघनं कुर्वन्ति तेषां विरुद्धेऽपिन कठिनं दण्डविधानं विद्यते निर्वाचना योगोऽपि सारल्येनैच तेषान् प्रति दण्डविधानं करोति।

समाजे वृद्धानां सम्मानः क्षीणतां गतः। युवानः स्वेच्छानुसारं कार्यं कर्तुं स्वतन्त्राः संजाताः। नियम-निर्मातारो नियमपालनं कारयितारश्च यथेच्छं धनं लभन्ते। केन कस्मै कीदृशो कियाँश्च लाभो मिलति इति दृष्टया एव परस्परं सम्बन्धा जायन्ते। सामाजिकजीवनस्य तन्तवो धनेन निगडिता जायन्ते। अस्माकं जीवने धनस्य एतादृशः प्रभावो जायते यद् वयं समस्तसामाजिकपारिवारिकसम्बन्धान् अनया तुलया एव तोलयामः। उक्तं च

**तानीन्द्रियाण्यविकलानि तदेव नाम**
**सा बुद्धिरप्रतिहतावचनं तदैव,**
**ह्यन्यः क्षणेन भवतीति विचित्र मेतत्।।**
**अस्तु सम्प्रति सर्वाणि नैतिकमूल्यानि समाप्तिं गतानि।**

सर्वाणि समाजिक कार्याणि नेतृत्वे धने वा निर्भराणि सन्ति। न हि कोऽपि सदाचरणं विदधाति न च सदाचरण-मभिलषति। केवलं मन्त्रिपदं नेतृत्वं धनं वाञ्छति। अतः भगवानेवास्माकं समाजस्य लोकतन्त्रस्य देशस्य च रक्षको विद्यते। इति शम्।

दीर्घा बालकथा

# राजकुमारी दर्दुरं वरयति

❑ डॉ. हर्षदेवमाधवः

पुरातनकाले कौशाम्बी नाम नगरी अतीव प्रचीना नगरी आसीत्। तत्र एका राजकुमारी आसीत्। तस्याः नाम मालती आसीत्। मालती अतीव सरला, मधुरस्वभावा आसीत्। सा मिष्टभाषिणी आसीत्। तस्याः दास्यः तां भगिनीम् इव परिचरन्ति स्म। परिवारे मालती केवलम् एका कन्या आसीत्। तस्याः पिता महाराजः उदयसेनः कौशाम्बीसाम्राज्यस्य राजा आसीत्। राजा राजकुमार्याः कृते एकस्य महालयस्य निर्माणम् अकारयत्। महालयः विशालः, भव्यः, स्फटिकनिर्मितः च आसीत्। महालये रत्नमयाः पारावताः डयन्ते स्म।

धारायन्त्रेषु कुसुमानां सौरभयुक्तं जलं दिशि दिशि उच्छलति स्म। महालयस्य स्तम्भाः सुवर्णमयाः आसन्। राजकुमारी यदा जलम् आनेतुं वदति स्म तदा तस्याः दास्यः दुग्धम् आनयन्ति स्म। उदयसेनस्य महिषी कमलादेवी अपि पुत्र्यां स्निह्यति स्म। राजकुमारी प्रतिदिनं मन्दिरं शिवार्चनं कर्तुं गच्छति स्म। विद्वांसः ब्राह्मणाः तां विविधशास्त्राणि पाठयन्ति स्म। विशारदाः आचार्याः तां नृत्यम्, सङ्गीतम्, कलाः अपि च वाद्यानि शिक्षयन्ति स्म। इत्थं राजकन्या सुशीला, विदुषी निपुणा च आसीत्। किन्तु सा सदैव सर्वजीवानां प्रति करुणां करोति स्म। राजकुमार्याः मालत्याः व्यवहारेण सर्वे प्रसन्नाः आसन्।

राजकुमारी षोडशवर्षीया अभवत्। उदयसेनः तस्याः जन्मदिवसे महोत्सवम् अकरोत्। राजकुमारी विविधमन्दिरेषु अर्चनम् अकरोत्। सा याचकेभ्यः अन्नं, वस्त्रं धनं च अददात्। राजकुमारी सखिभिः सह नृत्यम् अकरोत्। तस्याः नृत्यं दृष्ट्वा सर्वे प्रसन्नाः अभवन्। सन्ध्याकाले राजकुमारी शिवस्य अर्चनं कृत्वा प्रत्यागच्छत् तदा सहसा गगने जलदाः आगताः। जलदानां वर्षणं द्रष्टुं मालती महालयस्य वातायनम् उद्घाट्य शयनकक्षे वृष्टिं पश्यति स्म। शयनकक्षात् बहिः उद्यानम् आसीत्। राजकुमारी मालती उद्यानस्य क्लिन्नमृतिकायाः गन्धम् अनुभवति स्म। सहसा महालयस्य वातायनात् केचित् विविधिवर्णाः शलभाः प्रविष्टाः। शलभानां पक्षाः विशालाः आसन्। राजकुमारी शलभानां पक्षेषु किमपि लिखितं पठितवती। सा आश्चर्येण चकिता अभवत्।

शलभानां पक्षेषु 'राजकुमारी जयतु' 'राजकुमार्यै जन्मदिवसस्य शुभकामनाः।' 'राजकुमारी शतं वर्षाणि जीवतु।' इत्यादीनि वाक्यानि लिखितानि आसन्। राजकुमार्याः नेत्रे विस्मयेन विस्फारिते अभवताम्। तदैव वातायनात् स्वरः आगतः, 'हे राजकुमारी ! किं तुभ्यं रोचते मे शुभकामना? प्रसन्ना भवतु। अयं दिवसः वारं वारं तव जीवने आगच्छेत् हे दास्यः ! राजकुमार्याः कृते किमपि गायन्तु। राजकुमारी 'कः वदति?' इति द्रष्टुं प्रयत्नम् अकरोत् किन्तु सा कमपि जनं न अपश्यत्। तदैव वातायनात् भ्रमरीणां वृन्दं प्रविष्टम्। तत् वृन्दं मधुरं मधुरं गायति स्म–

**''राजकुमारी मालती, जाता षोडशवर्षीया।**
**सौम्या, मधुरा, स्निग्धा, निपुणा**
**सदैव भवतु प्रसन्ना।।''**

राजकुमारी मधुरं गीतं श्रुत्वा प्रसन्ना अभवत्। सा अपृच्छत्, 'हे भ्रमरीणां वृन्द ! हे सख्यः यूयं कस्य दास्यः स्थ?!'

भ्रमरीसु एका अवदत्, 'राजकुमारी एतत् रहस्यं वर्तते।'

द्वितीया अवदत्, 'राजकुमारी अस्माकं राजकुमारः तव योग्यः वर्तते।'

तृतीया अवदत्, 'सः सुन्दरः, सुरूपः च।'

चतुर्थी अवदत्, 'राजकुमार ! सः योग्यसमये मिलिष्यति।'

पञ्चमी अवदत्, 'राजकुमारी, अद्य त्वं प्रतीक्षां कुरु।'

तदा केचित् आग्नेयकीटाः आगच्छन्। तेषां प्रकाशेन महालयस्य रत्नानि विशेषतः प्रकाशितानि अभवन्। आग्नेयकीटाः अवदन्, 'हे राजकन्ये! हे उदयसेनस्य प्रियकन्ये! शुभरात्रिः। अधुना त्वं स्वपिहि। श्वः किञ्चित् आश्चर्यं भवष्यति।' राजकुमारी वातायनं पिधाय अस्वपत्। सा स्वप्ने मधुरान् स्वप्नान् अपश्यत्। प्रातःकाले सा जागरिता अभवत्। वातायनमुद्घाट्य बहिः अपश्यत्। बहिः उद्याने दीर्घिकायाः तटे सुवर्णहंसाः उपविष्टाः आसन्। राजकुमारीं दृष्ट्वा हंसाः वातायने उपविष्टाः। ते सर्वे अवदन्, 'राजकुमारी! नववर्षस्य शुभकामनाः।'

राजकुमारी मालती अवदत्, 'के यूयम्? यूयं कथं मां जानासि?' सुवर्णहंसानां नायकः अवदत्, 'त्वं सुरूपा, सुशीला, गुणयुक्ता च। अतः वयं त्वम् अस्माकं राजकुमारस्य प्रियतमा असि इति जानीमः। वयं मानसरोवरस्य हंसाः।'

मालती अपृच्छत्, 'किन्तु युष्माकं राजकुमारः कः अस्ति? मया तु असौ न दृष्टः।'

हंसानां नायकः अवदत्, 'राजकुमारि! त्वम् अपि अस्माकं राजकुमारं दृष्ट्वा विस्मिता भविष्यसि। सः अपि अत्यन्तसुन्दरः, मोहकः, कुलीनः, शालीनः विद्या-विशारदः अस्ति।'

मालती अवदत्, 'तर्हि युष्माकं राजकुमारं दर्शयत।'

हंसानां नायकः अवदत्, 'प्रतीक्षां कुरु। सः स्वयम् एव आगमिष्यति। किन्तु इदम् उपायनं स्वीकुरु। हंसानां नायकः एकां द्योतमानां मौक्तिकमालाम् अददात्।' राजकुमारी मालती तां कण्ठे धृत्वा प्रसन्ना अभवत्। सा हंसानां सुवर्णपक्षेषु सस्नेहं हस्तौ प्रसार्य स्वप्रसन्नताम् अदर्शयत्। हंसानां नायकः अवदत्, 'अनुज्ञां देहि राजकुमारि ! वयं क्षणं विश्रम्य मानसं प्रति गन्तारः अद्य एव।' राजकुमारी मालती दासीम् आहूय हंसानाम् आतिथ्यम् अकरोत्। हंसाः क्षीरम् अपिबन्। राजकुमारी चिरं यावत् वातायनस्य समीपे अतिष्ठत्। दास्यः मालतीं जलक्रीडार्थं गन्तुं प्रार्थयन्। राजकुमारी मालती स्नानार्थं दीर्घिकां गच्छति स्म। किन्तु मार्गे द्वौ श्वेतगजौ आगच्छताम्। तौ तस्या मार्गे पुष्पसारमयं जलं शुण्डाग्रेण न्यक्षिपताम्। मार्गे वृक्षोपरि स्थिताः विहगाः पुष्पाञ्जलिं व्यकिरन्। राजकुमारी सकौतुकं सर्वं व्यलोकयत्। यदा राजकुमारी स्नानं कृत्वा बहिरागता तदा जलाद् द्वे मत्स्यकन्ये जलाद् बहिरागच्छताम्। एकस्याः हस्ते शुक्तिसंपुटे सुगन्धिद्रव्याणि आसन्। द्वितीयायाः हस्तयोः रौप्यककूपिकायां तैलं, सुवर्ण-कङ्कतिका च आस्ताम्। एका मत्स्यकन्या राजकुमार्या गात्रेषु सुगन्धिद्रव्यैः शृङ्गारम् अकरोत्। अपरा राज्यकुमार्याः केशपाशं सुगन्धितैलेन सिक्त्वा, केशान् जूटयित्वा अवेष्टयत्। तदैव द्वे बलाके चञ्च्वोः दर्पणं धृत्वा पुरतः उपस्थिते अभवताम्। ते अपृच्छताम्, 'राजकन्ये ! पश्य, पश्य कीदृशी दृश्यसे त्वम्?' राजकुमारी अवदत्, 'किन्तु यूयं सर्वे मां कस्मात् परिचरथ? काः यूयं सर्वाः ?' बलाके अवदताम्, 'आवां राजकुमारस्य परिचारिके स्वः। आवां तव अपि परिचर्यां करिष्यावः।'

मालती अवदत्, 'किन्तु कः युष्माकं राजकुमारः ? सः कस्मात् मम समीपे न आगच्छति ?'

बलाके प्रत्युदतरताम्, 'अस्माकं युवराजः शीघ्रम् एव तव समीपे आगमिष्यति। धैर्यं बधान।' मालती पुनरपि किञ्चित् वक्तुकामा आसीत्। किन्तु बलाके अवदताम्, 'क्षमां कुरु। युवराजः स्वयमेव आगमिष्यति तदा त्वं सर्वम् अपि ज्ञास्यसि।'

मालती स्वमहालयं गन्तुं व्यचारयत्। तस्याः दास्यः ताम् अन्विष्य तत्र आगच्छत्। मालती अधुना अनेकेषु

विचारेषु विह्वला अभवत्। सा स्वभवनं प्रविश्य शयनकक्षे विश्रामं कर्तुम् ऐच्छत्। तदा शयनकक्षस्य वातायने एकः मयूरः आगच्छत्। तस्य पिच्छानि सुवर्णरूप्यकमयानि आसन्, पिच्छेषु रत्नानि खचितानि आसन्। मयूरः अपि मनुष्यवाण्याम् अवदत्, 'चिन्तां मा कुरु राजकुमारि! अस्माकं युवराजः स्वयमेव सप्ताहोत्तरम् आगमिष्यति। सः तव प्रश्नानां समाधानं करिष्यति।'

मालती सोत्साहम् अपृच्छत्, 'किन्तु सप्ताहोत्तरं कस्मात्?'

मयूरः अवदत्, 'सप्ताहोत्तरं वृष्टिः भविष्यति। अस्माकं युवराजः वृष्टिकाले एव प्रसन्नः भवति। किन्तु सः तव कृते उपायनम् अददात्।' मयूरः उच्चैः केकारवम् अकरोत् तदा आकाशमार्गात् चत्वारः वैनतेयाः एकां पेटिकाम् आनयन्। मालती सोल्लासं पेटिकाम् उदघाटयत्। पेटिकायाः एका सारिका निर्गता। सारिका विविधवर्णा आसीत्। तस्याः कण्ठे एकः पद्मरागमणिः शोभते स्म। सारिका अवदत्, 'मम नाम मधुरा। अहं सप्ताहं यावत् त्वया सह संलापं करिष्यामि। किन्तु युवराजविषये मां न पृच्छ। अन्यत् सर्वं त्वां कथयिष्यामि।' मयूरः पुनः अपि गगनम् अडीयत।

मालती अपृच्छत्, 'किन्तु राजकुमारः कुत्र निवसति? तस्य किं नाम? सः कस्य देशस्य राजकुमारः तस्य पित्रोः नाम किम्? – एतत् सर्वं वद। अथवा कस्मात् सः सप्ताहोत्तरम् एव मिलिष्यति?'

सारिका अवदत्, 'राजकुमारः यथा इच्छति तथा करोति। अहं तं न प्रष्टुं शक्ता। तथापि कथयामि यत् सप्ताहोत्तरं वृष्टिः भविष्यति। राजकुमाराय वृष्टिः अतीव रोचते। वृष्टिकाले एव सः बहिः निर्गच्छति। अहं त्वां सुन्दराः कथाः श्रावयिष्यामि।'

मालती अवदत्, 'अधुना त्वं मम सखी असि। अतः सर्वप्रथमं भोजनं कुरु।' सा दासीः आह्वयत्। दास्यः सुवर्णपात्रे फलानि आनयन्। सारिका तृप्ता अभवत्। सा अवदत्, 'राजकुमारि! त्वं सुरूपा, गुणान्विता मधुरस्वभावा किन्तु दयाशीला अपि असि।'

सारिका सप्ताहपर्यन्तं राजकुमारीं विविधाः अलौकिकाः कथाः अश्रावयत्। प्रतिदिनं राजकुमारः नवं नवम् उपायनं प्रेषयतिस्म। राजकुमारी मालती स्वप्नवत् सर्वं पश्यति स्म। सा विह्वला भूत्वा प्रतीक्षते स्म।

सप्ताहस्य पश्चात् अतीव वृष्टिः अभवत्। रात्रिकाले जलदाः वृष्टिं कृत्वा शान्ताः। राजकुमारी मालती वातायनस्य समीपे आसनं नाययित्वा बहिः उद्यानं प्रेक्षते स्म। तदा सा कस्य अपि स्वरम् अशृणोत्, 'मालति, कथम् असि त्वम्? किं मम प्रतीक्षां करोषि? अहं सदैव वचनं दत्त्वा न विस्मरामि। अहं त्वां मिलितुम् आगतः।' मालती सर्वासु दिक्षु अपश्यत्। किन्तु कोऽपि न दृश्यते स्म। मालती अपृच्छत्, 'महोदय ! अहं त्वां न पश्यामि। त्वं कुत्र असि? किम् अदृश्यरूपेण मां मिलितुम् आगतः त्वम्? अहं तु नास्मि देवकन्या। कृपया दर्शनं देहि।' पुनरपि अदृश्यस्य सत्त्वस्य स्वरः आगतः, 'मालति! अहं तव महालयस्य कक्षे स्थितः। अहं लघुकः जीवः। अहं नास्मि मनुष्यः न देवता। किन्तु अहं त्वयि स्निह्यामि।'

मालती स्वरस्य दिशं प्रति अपश्यत्। तत्र वातायनस्य एकस्मिन् कोणे लघुकः दर्दुरः स्थितः आसीत्। स मनुष्यवाचा अब्रवीत् किन्तु तस्य स्वरः साधारणमनुष्येण तुल्यः एव आसीत्। मालती प्रथमं तु चकिता अभवत्। पश्चात् सा भयम् अन्वभवत्। दर्दुरः पुनरपि अब्रवीत्, 'मा बिभेहि! अहं त्वां परिणेतुम् इच्छामि। अहं त्वयि स्निह्यामि।'

मालती मनसि व्यचारयत् यत्, 'नायं साधारणः दर्दुरः। अयं मनुष्यवाचि वदति। अयं मह्यं महार्हाणि उपायनानि अददात्। नूनं कोऽपि देवः मां परीक्षितुम् इच्छति। अतः तस्य स्वरूपं ज्ञात्वा निर्णयं करिष्यामि।'

दर्दुरः अवदत्, 'राजकुमारि! कस्मात् विचारयितुं श्रमं करोषि? अहं नास्मि मनुष्यः, नास्मि देवः। तथापि त्वयि स्निह्यामि। त्वं यत् प्रष्टुम् इच्छसि तत् पृच्छ। अहं सत्यं वदिष्यामि।'

मालती अपृच्छत्, 'त्वं मनुष्यः न असि। त्वं देवः अपि न असि। तथैव त्वं दर्दुरः अपि नासि। त्वं दर्दुररूपः कः असि?' दर्दुरः अवदत्, 'त्वं सत्यं वदसि। अहं दर्दुरः नास्मि। अहं कः अस्मि तदपि वदिष्यामि। किन्तु तत् पूर्वं मम एकम् उपायनं स्वीकुरु।'

दर्दुरः उच्चैः अवदत्, 'उपायनम् आनयत।' तदा अश्वमुखौ द्वौ पुरुषाकारौ देवौ आगतौ। तयोः हस्तेषु रत्नखचिता मञ्जुषा आसीत्। तस्यां गजमौक्तिकयुक्तः सुवर्णचूडामणिः आसीत्। नागमुद्रायुक्ता मुद्रिका आसीत्। चन्द्रिकायाः तन्तुभिः निर्मितानि इव शुभ्रवस्त्राणि आसन्। एतत् सर्वं दृष्ट्वा मालती मुदिता अभवत्। सा अवदत्, 'अनुगृहीता अस्मि। अहं एतत् सर्वं परिधाय नृत्यं कर्तुम् इच्छामि। किन्तु अहं त्वया सह नृत्यं कर्तुं कथं शक्नोमि? हे महाभाग? मम चिन्तां दूरीकुरु।'

दर्दुरः विहस्य अवदत्, 'त्वं चिन्तां मा कुरु। अद्य एव आवां चन्द्रलोके नृत्यं कर्तास्वः। त्वं शृङ्गारं कृत्वा सज्जा भव। अथवा मम दास्यौ आगन्तारौ।' दर्दुरः सङ्केतम् अकरोत्। आकाशमार्गेण द्वे अप्सरसौ आगच्छताम्। ते राजकुमार्याः शृङ्गारं कृतवत्यौ। दर्दुरः पुनः सङ्केतम् अकरोत्। चतुर्हंसयुक्तः रौप्यकमयः रथः आकाशात् अवातरत्। दर्दुरः राजकुमार्या सह रथारूढः अभवत् रथः आकाशमार्गम् अगच्छत्। कतिपयनिमेषाः व्यतीताः। रथः चन्द्रलोके अवातरत्। दर्दुरः कूर्दमानः नीचैः अवातरत्। राजकुमारी मालती अपि शनैः शनैः अवातरत्।

दर्दुरः अवदत्, 'अग्रिमौ द्वौ पादौ एव मम हस्तौ स्तः। अतः त्वं मम हस्तं गृहाण।' राजकुमारी नीचैः नत्वा स्वदक्षिणहस्तेन दर्दुरस्य दक्षिणपादम् अस्पृशत्। सहसैव चमत्कारः अभवत्। दर्दुरस्य स्थाने एकः मनोहरः सुन्दरः सुदृढः राजकुमारः आसीत्। तस्य मुखं चन्द्रसदृशं गौरवर्णम् आसीत्। भुजौ मांसलौ सुदृढौ आस्ताम्। तस्य पादौ अपि सुदृढौ बलवन्तौ। तस्य रूपं कामदेवेन तुल्यम् आसीत्। तं दृष्ट्वा मालती रोमाञ्चिता अभवत्।

अधुना दर्दुरस्य स्थाने राजकुमारः आसीत्। अतः मालती अपृच्छत्, 'त्वं कः असि? त्वं नूनं सुन्दरः, दिव्यरूपः असि। तव नाम किम्? त्वं स्वर्गे निवससि ? त्वं देवः एव असि। तव परिचयं देहि।' राजकुमारः अवदत्, 'मम नाम विभावसुः। अहं गन्धर्वाणां राजकुमारः। मम पिता प्रभावसुः, मम प्रपितामहः विश्वावसुः अस्ति। सुमेरुपर्वतः महान् पर्वतः अस्ति। तत्र अस्माकं राज्यं वर्तते। शतसहस्रयोजनानि यावत् मम राज्यस्य विस्तारः। गौरी नाम्नी अप्सराः मम माता अस्ति।'

मालती अवदत्, 'तर्हि किं मम परीक्षां कर्तुं त्वं दर्दुरस्य रूपम् अधारयः?'

'कीदृशः कस्य शापः अयम्?' मालती अपृच्छत्।

विभावसुः अवदत्, 'बहुवर्षेभ्यः पूर्वं मम पितामहः एकं यज्ञम् अकरोत्। देवगुरुः बृहस्पतिः पुरोहितः आसींत्। अहं मित्रेभ्यः कन्दुकेन अक्रीडम्। अहं कन्दुकं क्षिप्तवान्। असौ यज्ञकुण्डे अपतत्। कन्दुकस्य पतनात् काष्ठखण्डः यज्ञकुण्डात् उच्छलत्। असौ खण्डः बृहस्पतिगात्रे अपतत्। बृहस्पति दाहदग्धः अभवत्। अतः सः माम् अशपत्, 'अयं दुर्ललितः बालकः धर्मक्रियासु विघ्नम् उत्पादयति। अतः सः दर्दुरः भवतु।' तत् श्रुत्वा मम पितामहः व्यग्रः अभवत्। सः देवगुरुम् नत्वा अनुग्रहं कर्तुं सविनयम् अवदत्। तदा देवगुरुः अनुग्रहम् अकरोत्, 'यावत् पर्यन्तं तस्य विवाहः न भविष्यति तावत् पर्यन्तम् अयं दर्दुरः भविष्यति। विवाहोत्तरं स स्वरूपं प्राप्स्यति। किन्तु विवाहात् पूर्वं यदा यदा तस्य प्रियतमा तां स्प्रक्ष्यति तदा तदा सः स्वरूपं प्राप्स्यति।'

राजकुमारी विहस्य अवदत्, 'तर्हि अहं विवाहात् पूर्वं त्वां न स्प्रक्ष्यामि।' विभावसुः अवदत्, 'तर्हि यदि त्वं दर्दुरेण प्रणयं कर्तुं शक्नोषि, तर्हि मयि स्निह्य।'

ततः पश्चात् विभावसुः चन्द्रलोकस्य स्फटिकधवले भूमिप्रदेशे मालत्या सह अभ्राम्यत। सर्वत्र पारिजातानां सुगन्धः प्रसरति स्म। दीर्घिकासु श्वेतकमलानि प्रफुल्लानि आसन्। देवाः अप्सरोभिः मन्दारवृक्षच्छायासु गोष्ठीम् अकुर्वन्। विभावसोः सेवकाः रजतपात्रयोः मिष्टपेयम् आनयताम्। मालती विभावसुना सह मिष्टपेयम् अपिबत्। मालती अवदत्, 'मया कदापि ईदृशं स्वादिष्टं पेयं न पीतम्।' विभावसुः अवदत्, 'राजकुमारि! इदं दिव्यपेयम् अस्ति। इदं कदम्बपुष्पेभ्यः निर्मितम् अस्ति।' पेयं पीत्वा मालती विभावसुना सह नृत्यमकरोत्। यक्षाः गीतानि अगायन्। गन्धर्वाः वाद्यानि अवादयन्। अप्सरसः परितः नृत्यम् अकुर्वन्। मालती एतत् सर्वं वीक्ष्य रोमाञ्चिता अभवत्। कियान् समयः व्यतीतः तदपि ज्ञानं नासीत्।

ततः पश्चात् विभावसुः अवदत्, 'रात्रिकालः समाप्तः। अधुना त्वं महालयं प्रतिनिवर्तस्व। मम विवाहप्रस्तावं स्वीकुरु।'

मालती अवदत्, 'मम पितरौ मयि स्निह्यतितमाम्। तौ मम विवाहप्रस्तावं स्वीकरिष्यतः। अहं स्वयमेव निर्णयं कर्तुं न क्षमा। यद्यपि मम पिता मम हृदयं ज्ञात्वा निषेधं न करिष्यति, तथापि नः कुलस्य मर्यादा रक्षणीया।'

विभावसुः अवदत् 'तर्हि, अहं कतिपयान् दिवसान् यावत् दर्दुरः भवामि। भवतु तावत्। किन्तु मयि स्निह्यसि वा न वा?'

मालती अवदत्, 'अथ किम्। अहं त्वाम् एव मम पतिं मन्ये, किन्तु पित्रोः आज्ञा अनिवार्या अस्ति।'

विभावसुः अवदत्, 'मम यथार्थं स्वरूपं ज्ञात्वा तव पितरौ निषेधं न करिष्यतः। किन्तु अहं श्वशुरेण सह परिहासं करिष्यामि। त्वं चिन्तां मा कुरु।'

ततः विमानेन विभावसुः मालतीं महालयम् अनयत्। सः पुनरपि दर्दुरः अभवत्। अपरेद्युः राजा उदयसेनः गजारूढो भूत्वा राजामार्गे गच्छति स्म। तदा हस्तिपकस्य उष्णिषि दर्दुरः निलीनः अभवत्। सः उच्चैः अवदत्। राजन्! राजन्! अहं तव पुत्रीं परिणेतुम् इच्छामि। मया सह तस्याः विवाहं कारय।' एतत् श्रुत्वा राजा परितः अपश्यत्। सर्वदिक्षु नास्ति कोऽपि मनुष्यः, य एवं वक्तुं साहसं कुर्यात्। राजा उच्चैः अवदत्, 'कः मूर्खः मम कन्यां वरयितुम् इच्छति?' दर्दुरः अवदत्, 'नहि महाराज! अहं बुद्धिमान् त्वमपि बुद्धिमान्। तव पुत्री अपि बुद्धिमती। अतः एव अहं तां वरयितुम् इच्छामि। केवलं मूर्खस्य एव मूर्खकन्यकया, वा मूर्खवरेण विवाहः भवति।'

राजा उदयसेनः दर्दुरस्य वचनं श्रुत्वा अतीव क्रुद्धः अभवत्। सः हस्तिपकम् आदिशत्, 'एनं दर्दुरं गृहीत्वा गजस्य पादानां तले मर्दय।' दर्दुरः उच्चैः विहस्य अवदत्, 'महाराज त्वं मम श्वशुरः असि। अतः तव प्राणरक्षां करिष्यामि। मां हन्तुं त्वं न क्षमः। पश्य!'

दर्दुरः गजस्य कर्णं गत्वा कुतकुतम् अकरोत्। गजः कण्डूयनवशात् अघूर्णत्। राज्ञः उदयसेनस्य आसनं क्षुभितम् अभवत्। दर्दुरः पुनः गजस्य गण्डस्थलम् आगत्य शनैः प्राहरत्। अतः गजः शान्तः अभवत्। दर्दुरः अवदत्, 'पश्य, तव गजः मम किञ्चित् कर्तुं न समर्थः।' एवम् उक्त्वा दर्दुरः गजस्य पादयोर्मध्ये प्रविश्य निर्गतः। सहसा दर्दुरः महाकायः भूत्वा संमुखम् अतिष्ठत्।

पर्वताकारं दर्दुरं वीक्ष्य गजः अपि किंकर्तव्यमूढः स्थितः। तदा दर्दुरः अगायत–

**हन्तुं मां न शक्तः त्वम्।**
**राजन्! व्यर्थः प्रयत्नोऽयम्।**
**अहम् अवध्यः शस्त्रैः अस्त्रैः।**
**प्रेषय सैन्यं गजैश्च अश्वैः।**

दर्दुरः अवदत्, 'महाराज, श्वः प्रातःकाले तव सभायाम् आगत्य अहं तव कन्यायै याच्ञां करिष्यामि।'

इत्युक्त्वा दर्दुरः कुत्रापि तिरोहितः अभवत्।

राज्ञः उदयसेनस्य सैनिकाः दर्दुरम् अन्वेष्टुं प्रयत्नान् अकुर्वन्। किन्तु सर्वे प्रयत्नाः निष्फलाः अभवन्।

अपरेद्युः राजा उदयसेनः सैनिकानां व्यवस्थां द्विगुणीकृतवान्। राज्ञः सेवकैः त्रिवारं सभायां संमार्जनं कृतम्। राजा उदयसेनः सभायाम् उपविष्टः। तदा राज्ञः सिंहासनस्य पृष्ठदेशात् कः अपि अब्रवीत्, 'राजन् उदयसेन! अहं सभासमक्षं राजकुमारीं मालतीं वरयितुं प्रस्तावं करोमि। त्वं मां जामातृरूपेण वृणु।'

राजा क्रुधा प्रस्फुरिताधरः उच्चैः आक्रोशत्, 'सैनिकाः! एनं दुर्विनीतं दर्दुरं गृह्णत। तस्य करवालेन शिरच्छेदं कुरुत।' सैनिकाः दर्दुरम् अगृह्णन् सैनिकाः करवालैः प्रहारं कर्तुं प्रयत्नम् अकुर्वन्, किन्तु प्रतिवारं दर्दुरः अकूर्दत, सैनिकाः तं प्रहर्तुं नाशक्नुवन्। अन्ततः ते सर्वे श्रान्ताः अभवन्। तदा दर्दुरः अगायत्....

**प्रहरत प्रहरत सैनिकाः।**
**मां ननु घातयत सैनिकाः।**
**अहं निःशस्त्रः यूयं वीराः।**
**हन्तुं मां ननु भवथ अधीराः।।**

एकः सैनिकः तं हस्तपुटे अबध्नात्। राजा उदयसेनः आदिशत्, 'एनं दुष्टं दर्दुरं पर्वतोपरि नीत्वा क्षिपत। कामं तस्य प्राणाः गच्छेयुः, शरीरं च शतधा भवेत्।' दर्दुरः अवदत्, 'महाराज ! हिमालयात् अपि मम क्षेपणेन अहं जीवितः एव भविष्यामि। तथापि तव प्रभावं त्वं स्वयमेव पश्य।'

सैनिकाः दर्दुरं पर्वतात् अक्षिपन् किन्तु सहसैव पतनेन सहैव दर्दुरः सपक्षः अभवत्। सः वायौ डयमानः नीचैः आगतः दर्दुरः आकाशे अगायत्–

**आनन्दोऽस्ति गगने डयने**
**नैव पीडा मे गगनात् पतने।**
**सदैव हर्षो विलसति वदने..**
**सदने वसामि अथवा विजने।।**

सः पुनरपि राज्ञः समीपे अगच्छत्। तदा राजा उदयसेनः स्वसैन्यं परीक्षते स्म। दर्दुरः उच्चैः अवदत्, 'हे श्वशुर! तव दण्डस्य न कोऽपि प्रभावः। अहं जीवितः अस्मि।' सेनानायकः तं पुनरपि स्वशिरस्त्राणे बन्दिनम् अकरोत्। अधुना क्रोधात् रक्तनेत्रः उदयसेनः अवदत्, 'सैनिकाः चुल्यां तैलम् उष्णं कुरुत। यदा तैलम् उष्णं भवेत् तदा उत्काल्य तस्मिन् एनं वराकं दर्दुरं क्षिपत। अहं तं म्रियमाणं द्रष्टुम् इच्छामि।' सैनिकाः कटाहे तैलम् उदकालयत् अपि च उत्कलति तैले दर्दुरम् अक्षिपत्।

दर्दुरः अवदत्, 'हे वरुणदेव! मां रक्ष, रक्ष।' तदानीम् एव उष्णं तैलं शीतलम् अभवत्। तैलं जले परिवर्तितम्। दर्दुरः जलवत् तैले प्लवमानः अगायत्–

**उदयसेनः क्रूरोऽस्ति हन्तुं मां न च शक्तोऽस्ति।**
**नैव ददाति तस्य पुत्री मे स्वभावेन ननु कृपणोऽस्ति।।**

उदयसेनः पुनरपि सैनिकान् आदिशत्, 'एनं मूर्खं दर्दुरं रज्ज्वा बद्ध्वा मारय। यदि स रज्ज्वा न म्रियेत तदा तं कशाप्रहारैः प्रहरत।' सैनिकाः पुनरपि दर्दुरं घातयितुं रज्जुपाशं व्यरचयन्। किन्तु दर्दुरः स्वशरीरं संकोच्य मुक्तः अभवत्। ततः पश्चात् सः स्वयमेव वायौ आलम्बनं विना स्थितः। तदा सहसा अदृश्यानि सत्त्वानि कशाप्रहारैः सैनिकान् अताडयन्। सैनिकाः चीत्कारं कृत्वा पलायिताः अभवन्।

उदयसेनः उच्चैः सैनिकान् आदिशत् 'एनं पापं विषपात्रे निक्षिप। दर्दुरः अवदत्,' 'महाराज, मां हन्तुं तव समीपे ये उपायाः मायाः सन्ति तेषां सर्वेषां प्रयोगं कुरु।' सैनिकाः विषपात्रम् रात्रिम् आनयन्।

दर्दुरः अगायत्–

**राज्ञा दत्तं विषस्य पात्रम्। मह्यं ननु तत् पेयं मात्रम्।**
**अमृतं मत्वा विषं पिबामि। नैव बिभेमि, ऋतं वदामि।**

दर्दुरः अवदत्, 'अहं विषं पिबामि। यदि तव राज्ये अन्यदपि यदपि विषम् अवशिष्टं चेत् तदपि आनय।'

दर्दुरः समग्रं पात्रम् अपिबत्। सः पुनः अवदत्, 'महाराज! अधुना तव कन्यायै मम विवाह-प्रस्तावं स्वीकुरु।'

राजा उदयसेनः अवदत्, 'कदापि न हि। अहं मम कन्यायाः विवाहं दर्दुरेण सह नैव करिष्यामि। कामं सा अविवाहिता तिष्ठेत्।' तत्। 'अहं स्वयमेव निशितेन खड्गेन त्वां हनिष्यामि।'

दर्दुरः अवदत्, 'त्वमपि यत् कर्तुं शक्यं तत् कुरु। अहं तु तव कन्यां मम पत्नीं कर्तुं कृतसङ्कल्पः अस्मि।' शृणु–

**'हे राजन् ! तव कन्यां देहि**
**यद् यद् उचितं तत् च विधेहि।**
**भविष्यति ते कन्या सुखिनी....'**

**8, राजतिलक बंगलो, आबाद नगर निकटे,**
**बोपल, अहमदाबाद**

---

# सूक्ति-सुधा

❑ **डॉ. प्रेमचन्द्र रांवका, पूर्व आचार्यः**

**( 15 वीं.श. आचार्य सकलकीर्ति रचित सुभाषित रत्नावलीतः )**

**मद्यकुम्भो यथा शुद्धो न स्याद् धौतः सरिज्जलैः।**
**स्नानेनापि तथा जीवो मिथ्यात्वादिमलीमसः।।**

– मद्य से भरा घड़ा जैसे नदियों के जल से धोया हुआ शुद्ध नहीं होता, वैसे ही मिथ्यात्वादि (क्रोध, मायाचारी) से मलिन जीव (मनुष्य) स्नान से शुद्ध नहीं होता।

**घृतकुम्भो यथा शुद्धो मलिनोऽपि विना जलैः।**
**तथा मुनीश्वराः ज्ञेया ज्ञानचारित्रनिर्मलाः।।**

– जैसे घृत से भरा घड़ा बाहर से मलिन होने पर भी जल के बिना शुद्ध होता है, वैसे ही सम्यक् ज्ञान और सम्यक् चारित्र से निर्मल मुनियों को जानना चाहिये।

**ते नेत्रे सफले मन्ये पश्यतो ये जिनं गुरुम्।**
**श्रुतमन्यत्र पश्येतां व्यर्थे पापप्रदे ध्रुवम्।।**

– मैं उन नेत्रों को सफल मानता हूँ जो रागद्वेष को जीतने वाले श्रेष्ठ देव, गुरु और श्रुत (शास्त्र) का दर्शन करते हैं। अन्यत्र देखने से पाप बन्ध होता है।

**तौ कर्णौ सफलौ ज्ञेयौ पीयमानौ श्रुतामृतम्।**
**पापशास्त्रादि शृण्वन्तौ निष्फलौ स्फुटितौ वरम्।।**

– उन कानों को सफल जानना चाहिये, जो शास्त्र रूपी अमृत का पान करते हैं। पाप रूपी शास्त्रों को सुनने वाले कान निष्फल व फूटने योग्य हैं।।

**तां जिह्वां सफलां मन्ये या ज्ञानामृतलालसा।**
**दशधा धर्मोपदेशेऽसच्छास्त्रे पापदा भवेत्।।**

– मैं उस जिह्वा को सफल मानता हूँ, जो ज्ञान रूपी अमृत और दशविधधर्म (क्षमा, मार्दव, आर्जव, सत्य, शौच, संयम, तप, त्याग, आकिंचन्य और ब्रह्मचर्य) के उपदेश में रुचि रखती है। शेष जो असत् शास्त्र में लालसा रखती है वह पाप-दु:ख दायक होती है।

**22, श्रीजीनगर, दुर्गापुरा, जयपुर**

# देवर्षिवैभव-वन्दनम्

❑ डॉ. शिवदत्तशर्मा चतुर्वेदः

प्रणमति विद्वत्संघो देवर्षिं श्रीकलानाथम्।
निखिलागमसंसारेऽद्यत्वे नित्यं प्रतीकसज्ज्योतिम्।।

बाल्याऽवस्थातोऽयं प्रतीकरूपेषु संयातः।
तस्मै साञ्जलिबन्धं स्वादरभावं प्रकाशयन्नस्मि।।

तेनाऽनेन विलक्षण-विभा-सनाथेन चांग्लसाहित्ये।
एम.ए. पद-सम्प्राप्तिर्विहिता कलैव प्रकटीकृता चैका।।

संस्कृतंसाहित्येऽपि च नदीष्णतां प्राप्य नित्यमयम्।
दिव्यचमत्कृत पद्यप्रणयनपटुतां विधारितवान्।।

काचिदियं सा दिव्या कलैव जन्मार्जितैवासीत्।
काव्यानां निर्माणं कलासु मूर्धन्यतां भजते।।

कविता-शिरोमणीनां संसारे ख्यात-सन्नाम्नाम्।
श्रीमथुरानाथानां सत्पुत्रत्वं कलैवैषा।।

बाल्ये वयसि सभासु च मञ्चे पट्टे समारुह्य।
छन्दोमय्या वाचा परिषन्मोहः कलैवासीत्।।

लक्षाधिकसंख्यास्वथ मूर्धन्यत्वं परीक्षासु।
सुस्वागत-सम्प्राप्तिः कला प्रणम्यैव निखिलेयम्।।

नूनं पितरौ धन्यौ ज्योतिषिवर्योऽपि धन्यतरः।
नामकरणसंस्कारेऽन्वर्था संज्ञा समीड़िता यैर्वा।।

कालेऽस्मिन्दुष्प्राप्या ऋषित्वरूपान्वितिः किन्तु।
देवर्षित्वाऽवाप्तिः सुदुर्लभा साधिता सम्यक्।।

सिद्धायां लेखिन्यामक्षरधारावलिः सेयम्।
सहृदय-हृदयोल्लासे प्रतीक्ष्यमाणा सदा जयति।।

अभिनन्दन-सद्ग्रन्थावलिरेषा नव्यसाहित्ये।
स्वीयाऽनुपमं स्थानं लब्ध्वा विद्वद्भिराद्रियते।।

तत्र च देवर्षीणां श्रीलकलानाथ-शास्त्रि-वर्याणाम्।
अभिनन्दन-सद्ग्रन्थः प्रतीक्षितो भूरिशो भव्यः।।

देशे तथा विदेशेष्वथ शंसायां समुद्यतास्ते ते।
अहमहमिकयाऽनुभवप्रकटनयोगं प्रतीक्षन्ते।।

एकोऽप्ययं कथं वा संख्यातीतेषु रूपेषु।
सहृदय-हृदयाऽऽकाशे विराजते वा कलानाथः।।

अभिनन्दन-सद्ग्रन्थे विद्वद्भिः स्वीय रचनासु।
नानाऽनुभव-प्रकटन-धन्यत्वं धार्यते नूनम्।।

केषां केषां तावद्विषयाणां गूढ़तम-रूपम्।
प्रकटीकृतमेभिर्वा सहस्रशो लेख-भाषणावल्याम्।।

इदमित्थंभावेन तु तत्कथनं सर्वथा कठिनम्।
किन्त्वञ्जसा समासैर्व्यासैर्वा सा चमत्कृतिर्भूयात्।।

अभिनन्दन-सद्ग्रन्थान् नाना नव्येषु रूपेषु।
दृष्ट्वा मया निवेदितमासीद् देवर्षिवन्दने तदिदम्।।

यद्यप्येतत्कार्यं नानाविधशोधमावहति।
नैकेषामथ विदुषां सहयोगं पूर्णमाह्वयति।।

नैकवर्षपर्यन्तः कालावधिरपि तत्र सन्दृश्यः।
जीवन-समुद्र-मन्थनममृतं तद्वै पुरस्कुर्यात्।।

आत्म-कथा-साहित्यं प्रवर्तितं बाणभट्टेन।
तदपि सुविकसित-रूपेऽद्यत्वे विद्वद्भिरादृतं जयति।।

जीवनस्य पृष्ठद्वयमिति यल्लिखितं कलानाथैः।
आत्मचरितसच्चर्चा तत्राऽस्ते भावभूतिभिर्भरिता।।

वन्दनीय-सच्चरितैर्वन्द्यैः श्रीमञ्जुनाथैर्वा।
जनकैर्यो यः पन्थाः प्रवर्तितस्तत्र संचरन्नास्ते।।

संस्कृत-मासिकपत्रे सम्पादकतामथारुह्य।
देशे तथा विदेशे विख्यातास्ते कलानाथाः।।

भारतीति सन्नामक-संस्कृत-मासिक-सुपत्रस्य।
सम्पादने नवीना सरणिः काचित्प्रवर्तिता जाता।।

याऽसीद्विहिता सेवा साहित्ये कविशिरोमणिभिः।
बृहती खलु सा वार्ता लघुमुखतो न प्रकटिता स्यात्।।

तेषां सच्चर्चास्वथ संगोष्ठीनां प्रवर्तनं विहितम्।
नैके शोध-निबन्धाः प्रकाशिताः संग्रहे सन्तः।।

सत्काव्यमहारत्नं दिव्यं साहित्य-वैभवं च पुनः।
सम्यक् प्रकाश्य निखिला रचनास्तेषां प्रकाशिता जाता।।

सैषा पूर्तिर्जाताऽभावे या शूलयति हृदयम्।
सर्वमद्य सुलभं तत् संसारोऽयं नवीनतां लभते।।

प्रथम-मुद्रणानां नन्वभाव-भावे समागते क्व पुनः।
काव्याऽमृत लाभार्थी गच्छेदेतद् विचारितं तैस्तैः।।

पूर्वं रचनाकार्ये श्रमस्तदनु तत्प्रकाशने यत्नः।
कियता काठिन्येन तु संसाधितमेतदतिमधुरम्।।

पुत्रोऽयं साधितवान्सत्कार्यं कविशिरोमणीनां वा।
पितृऋणान्मुक्तिरियं काचिज्जाता भवेन्नाम।।

पितुर्यशोवर्धकता मुख्या वा मुक्तिधारेयम्।
तत्राऽद्य दीप्यतेऽयं महानुभावः कलानाथः।।

आंग्लायां भाषायां साहित्यस्य प्रधानतां यातः।
अध्यापन सेवायां प्राध्यापकतामनुष्ठितवान्।।

संस्कृतसाहित्येऽसौ चूडान्तं ज्ञानमाराध्य।
परिनिष्ठितपाण्डित्यस्तथैव दृष्टो विदेशसाहित्ये।।

एषा कलैव नित्यं विकसति नित्यं विलासयति।
तेनैवान्वर्थेयं नामनि धारा प्रणम्यतां याता।।

शिक्षणसिद्धिख्यातिर्जाता सा तादृशी काचित्।
तुष्टोऽधिकारिवर्गः भाषा भागे प्रवेशितवान्।।

तत्राधिकारिवर्गं स्वीयकलाभिः सुसन्तोष्य।
मुख्यां प्रधानपदवीमासाद्यैवाथ सन्तुष्टः।।
तत्र स्थितस्तु नाना प्रान्ते भ्रमणं विधायाऽयम्।
स्वीय विभागोन्नतये सूक्ष्मं हृदयं समीहितवान्।।
नानाविदेशयात्राः साधितवांस्तत्रसंस्थोऽयम्।
वैदेशिक-विद्वांसः सद् व्याख्यानैश्चमत्कृता जाताः।।
सेवातो निनिवृत्तौ संजातायां च मान्योऽयम्।
राजस्थाने संस्कृत अकादमी मुख्यतां यातः।।
देशस्य राष्ट्रपतिना सर्वश्रेष्ठैः पुरस्कारैः
सम्पूजितोऽथ सोऽयं सुमानपत्रं प्रलब्धवांस्तस्मात्।।
दिव्यकथानकवल्लीं संस्कृतरचनामथालक्ष्य।
केन्द्रीयाकादेमी पुरस्करोतिस्म तं सद्यः।।
नूतनतरसाहित्ये कथाविधेयं प्रतिष्ठिता जयति।
संस्कृतलेखककवर्यास्तत्र तु पश्चात्पदाः प्रद्दश्यन्ते।।
संस्कृत-मासिक-पत्रे सम्पादकतां सुबिभ्राणाः।
देवर्षि-कलानाथाः कथाविरचनेषु मार्मिका द्दष्टाः।।
न केवलं वा यथा तथा वा लिखिताः स्युस्ताः कथाः सर्वाः।
अकादमी-विद्वांसोऽप्यादरभावं प्रदर्शयन्त्यत्र।।
महाकाव्यरचनासु तु नाना विषयेषु सद्ग्रन्थाः।
अकादमी संरम्भे पुरस्कृता जायमानाः स्युः।।
किन्तु संस्कृते नव्या सेयं दिव्या कथानक वल्ली।
शैलीमेकां धृत्वा पुरस्कृतिं सादरं लभते।।
कस्मिन्नपि निजवार्ताक्रमे तथा बोधितोऽहं तैः।
संस्कृतेऽपि संपाद्यः संग्रह-रूपेण लघुकथाग्रन्थः।।
सा प्रेरणैव जाता हृदये कामपि चमत्कृतिं दघती।
अभिनव-कथा-निकुञ्जः कश्चन सम्पादितो मया ग्रन्थः।।
नाना पाठ्यक्रमतां बिभ्राणोऽयं मदीय सद् ग्रन्थः।
नैकेष्वथ संस्करणेषु प्रतिवर्षं वै प्रकाशितो जातः।।
अधुना संपूर्णानन्दे संस्कृतविश्वस्य शालातः।
'संस्कृत-कथा-कुञ्ज' इति प्रकाशितोऽस्त्येव स ग्रन्थः।।
देवर्षिप्रवराणां सा काचित्प्रेरणैवाऽसीत्।
यया प्रथमतायां किल संग्रह एकः प्रकाशितो जातः।।
इत्थं नानारूपे तदीय सत्प्रेरणाश्चलिताः।
नव नव विद्वांसोऽपि च नव लेखनकार्यसंलग्नाः।।
स्वयमप्यद्य नवीनां लेखानां पद्धतिं द्दष्ट्वा।
पत्रिकासु सद्ग्रन्थाऽलोचन कार्ये स्वयं लग्नाः।।
'भारतीति' यत्पत्रं संस्कृतमासिकतया ख्यातम्।
तस्मिन् शब्दानां सा नवीनधारा प्रदर्शिता एभिः।।
भाषा-त्रितये-तावत्तत्र च ते व्यावहारिकाः शब्दाः।
धारावाहिकतायां प्रकाशिता तैः स्वयं नूनम्।।
संस्कृतज्ञ-समुदायस्यैका विकृता छविर्ध्वस्ता।
तस्यैव सत्प्रयत्ने दिवाऽनिशं जागरूकास्ते।।

स्वीये व्याख्यानेऽपि च सरलां भाषां निवेदयन्तोऽमी।
श्रीदेवर्षिवरेण्याः पूज्यन्ते श्रीकलानाथाः।।
शताधिकग्रन्थेष्वथ तद्रचिता भूमिका भव्याः।
आवर्जयन्ति पाठकवर्याणां ध्यान-साधनं कर्तुम्।।
हिन्दीभाषायामपि लेखककवयस्तथा चैतान्।
स्वीये ग्रन्थे सम्मति-दानायाथ प्रतीक्षन्ते।।
धार्मिक-सुबृहत्सम्मेलनमपि तान् संप्रतीक्षते नियतम्।
तदभावे सम्मेलन-कल्पनमपि कल्पनैव स्यात्।।
नव्यतरास्तु विचारा विवेचनैर्भाषणे तेषाम्।
पुरातनैरादर्शैस्तुलिताः सन्तो निभाल्यन्ते।।
अथ नित्याऽध्ययनेष्वप्याङ्ग्ले साहित्यसंसारे।
विचरण-गहन-विचार-प्रकटन-सन्दीपिताः प्रदृश्यन्ते।।
संकेतैरप्येते स्वीयानुच्चैः प्रकुर्वन्ति।
मामपि राष्ट्रपतीनामग्रे गन्तुं कृपायितं त्वेभिः।।
जयपुर-यात्रा-सा सा यदैव जाताऽस्मदादीनाम्।
देवर्षिदर्शनैः सह तद्वार्तामुख्यता भवति।।
यदा यदा गच्छामो गृहं तु तैः सह समालपितुम्।
तदा तदा ते द्दष्टाः नैकैर्विद्वद्भिरावृता एव।।
किन्तु कृपैव हि तेषां मां द्दष्ट्वैवाथ स्वीकृत्य।
मत्प्रणामपरिपाटीं सर्वानन्यान्विसर्जयन्त्ये।।
तदनन्तरं कियान्वा कालो व्यतियापितो जातः।
नो जानामि न वा ते जानन्तोऽपि च न जानन्ति।।
वार्ताक्रमस्तु तादृक् तेषां सविधे समस्यानाम्।
उत्थापनेषु विधिवत्समापनेष्वपि पदं लभते।।
मयैकदा पृष्टास्ते संस्कृतभाषैव केवलं द्दष्टा।
द्विवचनमथ शब्देषु स्थानं ददती न काप्यन्या।।
आंग्ला-हिन्दी-भाषा-प्रान्तीयाश्चापि या भाषाः।
एकवचन-बहुवचने द्वितये कार्यं प्रकुर्वन्ति।।
केवलमेकैवेयं संस्कृतभाषा तथा द्दष्टा।
वचनत्रितयं यस्यां संज्ञास्वथ च क्रियापादेषु संद्दष्टम्।।
ज्ञाने गौरववर्धनमेतत्किंवा लाभं समधिकृत्य।
फलमथ किं वा लब्धं नाद्यापि तु मुक्तमभ्यासे।।
तदा समाधाने तैरुक्तं भाषासु चान्यासु।
द्विवचन सद्भावोऽयं लोचनगतो लभ्यः।।
ग्रीकेऽपि लैटिनेऽपि च पूर्वमभूद् द्विवचनं किन्तु।
लुप्तं मध्येकालं केवलमरबीयमध्यमधुनाऽस्ति।।
महाभाष्यतोऽप्येते वाक्यान्युत्थापयन्ति स्म।
किन्तु द्विवचन विगमेऽपि च न स्याद् व्यावहारिकी हानिः।।
तत्रैकमत्यमासीत्प्रायस्तेषां समस्तेऽस्मिन्।
ज्ञानलाघवं कर्तुं संस्कृत-भाषाऽपि भूयसी भूयात्।।
भाषाविज्ञानस्य च सुमहद्गाम्भीर्यमास्थाय।
तुलनात्मकमालोचनमेषां कक्षे मया श्रुतं चकितम्।।

कम्प्यूटरे युगेऽस्मिन्पाणिनिसूत्राणि निखिलानि।
अतुलं निजप्रभावं विद्वद्हृदयेषु निक्षिपन्त्यद्य।।

आश्चर्यं तु तदेतत्तस्मिन्कालेऽपि पाणिनिर्भगवान्।
संक्षिप्ततमसूत्रमालां कियतीमवतारयामास।।

कथयन्ति कलानाथा नामग्राहं वरेण्यानाम्।
पाश्चात्यानां विदुषां पाणिनिविषयेऽथ वक्तव्यम्।।

अन्यो विचार-बिन्दुर्मया समुत्थापितोऽथ तत्पार्श्वे।
नाटक-रचनावल्यां प्राकृतभाषाप्रयोगमालक्ष्य।।

महिला पात्राण्यथवा निम्नगवर्गस्य पात्राणि।
प्राकृत-भाषायामथ कथयन्तितरां स्ववक्तव्यम्।।

कवयस्ते ते सर्वे महाकवित्वेऽपि चारूढाः।
स्त्रीपात्र-निम्नपात्राणां मुखतः प्राकृतं वहन्तिस्म।।

संस्कृत-भाषाज्ञानं तेषां नासीदतो हेतोः।
व्यवहारेषु प्रचलितप्राकृतव्यवहार आयातः।।

व्यवहारे सर्वत्र प्राकृत-भाषा प्रचलिताऽऽसीत्।
तस्या व्यवहारेषु तु काठिन्यं नो निभालितं तैर्वा।।

संस्कृत-भाषाऽध्ययने तेषामवरोध एवाऽसीत्।
तेन प्राकृत-भाषा नाट्ये तेषां समायाता।।

देवर्षीणामग्रे मया तदाऽऽवेदितं चैतत्।
अद्य त्वभिनयेष्वथ प्राकृत-भाषाऽपि सा लुप्ता।।

सर्वाण्यपि पात्राणि तु संस्कृतमेवाऽद्य कथयन्ति।
यतः प्राकृता भाषा व्यवहारेष्वद्य नास्त्येव।।

कुतो न प्राकृतस्थाने हिन्दीभाषा प्रयुक्ता स्यात्।
तुल्यन्यायादद्य तु हिन्दी व्यवहार सम्प्राप्ता।।

देवर्षयस्तु तद्वै श्रुत्वा तस्मिन् विचारसंभारे।
सम्यक्तया समर्थन-भावेषु व्याहरन्ति स्म।।

नाट्यविरचनाकाले प्राकृतभाषा यथैवाऽसीत्।
तथाऽद्य हिन्दी भाषा प्रान्तीया वा तथा भाषाः।।

अत एव प्राकृतेऽपि नानाभेदाः प्रदृश्यन्ते।
सा मागधीति जाता कुत्रचित् शौरसेनीति।।

अन्यान्यपि नामानि प्राकृत भेदे प्रजातानि।
नाना पुस्तकरूपे लिख्यन्ते वाऽथ बोध्यन्ते।।

सामाजिकी तु सामान्या सैषा स्थितिरास तत्काले।
संस्कृत-परिचयहीनाः भाषास्वेतासु कथयन्ति।।

अद्य तु ताः सर्वा अपि प्राकृतभाषाः सुकठिनाः स्युः।
तदपेक्षया तु संस्कृत-भाषैवाद्याथ सरलैव।।

तेनैवाद्यत्वे खलु संस्कृत-नाट्य-प्रयोगेषु।
प्राकृत-प्रयोगे विषये संस्कृतमेव प्रयुज्यते नाट्ये।।

किन्तु प्राकृत-भाषा स्थाने हिन्दी प्रयुक्ता स्यात्।
प्रान्तीया वा भाषास्तत्तत्प्रान्ते प्रयुक्ताः स्युः।।

संस्कृतनाटकमञ्चनमेतत्परिवेशमालक्ष्य।
यदि प्रस्तुतं भूयाल्लोकाऽकर्षणमथ प्रवृद्धं स्यात्।।

इत्थं तावत्तेषां नव्य विचारावलिर्भव्या।
नाना लेखे लिखिता भाषणवेलास्वथ च सम्पुष्टा।।

स्वीय भूमिका रचनास्वेते देवर्षयो नितराम्।
तत्तद्ग्रन्थविषयिणीं रहस्यमालां लिखन्त्येव।।

चरमेऽस्मिन्वयसि तु नैरन्तर्येण चाऽध्ययने।
संलग्नास्ते मान्या दृश्यन्ते वै कलानाथाः।।

पद्यानां रचनायां सा संसिद्धिः कुलक्रमाऽयाता।
सहृदय-हृदयाऽवर्जनकरणे नित्यं नवीनैव।।

कविता-शिरोमणीनां दिव्यानां मञ्जुनाथानाम्।
एकाऽपि काऽपि रचना प्रबन्धसौन्दर्यमावहन्त्यास्ते।।

वारं वारं पठिता पठिता पठिता पुनः पुनः पठिता।
पाठक-हृदयाकाशं विनिर्मलं पारदर्शकं कुरुते।।

सैव स्थितिरद्यत्वे सन्दृष्टा श्रीकलानाथे।
पद्यमयी यद्धारा हृदये विनिविश्य निर्मलं कुरुते।।

ताराशंकर-शास्त्री शोध-निबन्धं समर्पितवान्।
शोधोपाधिर्लब्धो देवर्षीणां कृतित्व सद्विषये।।

अधुनैव तु विज्ञातं शोधनिबन्धोऽयमायातः।
मुद्रितरूपे कश्चित् अभिनन्दनभूमिका सेयम्।।

रस-गंगाधर-नामा पण्डित-राजस्य ग्रन्थराजो वा।
आंग्लायां भाषायामनूद्यते श्रीकलानाथैः।।

काव्य-प्रकाश-नामा मम्मटभट्टस्य रचनेयम्।
नैकांग्लैरनुवादैः सुभूषिता दृश्यते बहुशः।।

महामहोपाध्यायैर्गङ्गानाथैस्तु झाप्रवरैः।
काव्यप्रकाश एषोऽनूदित एवाऽस्ति चांग्लाभाषायाम्।।

श्रीरामचन्द्र विद्वद्भि र्द्विवेदिभिर्वाऽप्यनूदितश्चांग्ले।
अन्ये चाप्यनुवादा तस्य ग्रन्थस्य संजाताः।।

किन्त्वथ रसगंगाधर सद् ग्रन्थस्याथ चांग्लभाषायाम्।
अनुवादाख्यं कृत्यं नितरां काठिन्यमावहति।।

किन्तु कलानाथैरथ रस गंगाधर सदनुवादे।
आंग्लायां सा काचिन्नव्या शब्दावलिः समाकृष्टा।।

अवच्छेदका शैली नव्यन्यायस्य सा भाषा।
पण्डितराजस्यासील्लेखन्यां नित्यविस्तीर्णा।।

आंग्लायां भाषायां निष्णाताः श्रीकलानाथाः।
प्रभवन्ति तत्र विषये स्वीयां धारां प्रचालयितुम्।।

हिन्दी रसगङ्गाधरनामा कश्चित्प्रकाशितो ग्रन्थः।
हिन्द्यनुवादे रचितः श्रीमत्पुरुषोत्तमैश्चतुर्वेदैः।।

आंग्लायां भाषायां नास्त्येवैकोप्यनूवादः।
रसगंगाधरनामकसद्ग्रन्थस्यास्य संसारे।।

तत्रैवैते नूनं कृतसंनाहा विलोक्यन्ते।
विद्यावाचस्पतयो देवर्षय एव कलयैव।।

कुर्वन्तु श्रममात्रमन्यत्रान्यत्र ग्रन्थेषु।
विद्वन्मन्यास्ते ते श्रमपीडां पाठयन्त्येव।।

भाषाऽन्तरेऽन्यदीयं श्रममादायाथ ते चैते।
संस्कृतसद्भाषायामाकुलयन्तः स्वयं दृष्टाः।।
किन्त्वेतेषामपि वा पृष्ठं सम्पोषयन्त्येव।
श्री देवर्षिवरेण्यास्तैस्तैरतिशयमनोहरैः शब्दैः।।
अजातशत्रवः सन्ति तु मित्राण्यथ ते तु सर्वेषाम्।
नाना सत्साहित्यश्रमेषु वा सावधानानाम्।।
धन्या तथा मान्या सैषा नूनं च भातृजाया वा।
या नित्यं सेवायां बलप्रदानं करोत्येव।।
एतादृश-सद्विद्वन्मान्यानां पुरुषसिंहानाम्।
जाया छायाभूता शक्तिः काचित्सुकोमला कठिना।।
गृहगमने सुस्वागतमासीदनया यथा विहितम्।
वारं वारं यात्रा तत्र भवेद्वा मनो भवति।।
एतेषामाभिनन्दन-कार्ये ये येऽद्य संलग्नाः।
सम्पादकाः प्रकाशकवर्या वा कलहमापन्नाः।।
यत्सेवायाः कार्ये कलहायन्तेऽथ विद्वांसः।
देवर्षिप्रवराणामेषाऽपि तु सा कला काचित्।।
नामैवान्येषामथ तेषां तेषां तु तादृशं जातम्।
विमनायन्त लोकाः संश्रवणे सावधानाः स्युः।।
एतन्नामसहस्रं वारं वारं गृहीत्वाऽथो।
पुनः पुनर्वा जपितुं विहिता बुद्धिर्मदीयेयम्।।
सा लेखनी सुधन्या विलेखने यां कलानाथाः।
करेऽथ कुर्वन्तो वा काव्यं निर्मान्ति नव्यतरम्।।
तेषां चरित्रमेतद् बृहन्महाकाव्य विषयभूतं वा।
द्वित्रैरेभिः शब्दैः कियतीमात्रा तु कथिता स्यात्।।
वन्दामहे नितान्तं देवर्षिं श्रीकलानाथम्।
निखिललोकमान्यत्वे संस्थितिरेतस्या काम्यते नित्यम्।।

( राष्ट्रपतिसम्मानितः )
जी-28, अरविन्द कॉलोनी,
संस्कृतविभागाध्यक्षचरः, काशी हिन्दू विश्वविद्यालयः वाराणसी।



# आद्यशंकराचार्यस्य आत्मबोधग्रन्थे

## ''मोक्ष साधन वर्णनम्''

❑ युगल किशोर भारद्वाजः

पूज्यपादजगद्गुरूशंकराचार्येण विरचितः आत्म-बोधाख्य ग्रंथोऽयं मोक्षार्थीजनेभ्यः उपकारार्थं कलयाणार्थं श्रेष्ठतरः अस्ति। वेदशास्त्रस्य सारभूतोऽस्ति आत्मतत्वस्य प्रबोधकः गुणिजनानां अतीव हितकरः ग्रन्थोऽयम्। अज्ञान-नाशनार्यं श्रीमद्शंकराचार्यस्य आत्मज्ञानस्य महिमा संसारे सुप्रसिद्धः।

आद्यगुरुणा विरचितः आत्मबोधः यथानामगुणधारकः जिज्ञासुमुमुक्षु जनानां हितार्थं सुप्रसिद्धः।

मोक्षार्थीजनाः ये आत्मतत्वं ज्ञातुमिच्छन्ति तेषां कल्याणार्थं सर्वथा अपेक्षितं गदितम्।

तीव्रतपोयोगेन येषां जनानां पापक्षयो जातः ये राग रहिताः वीतरागाः तेषां हितार्थं सुप्रसिद्धो ग्रन्थोऽयम्। ये जना रागरहिताः क्षोभरहिताश्च ते एव परमशान्तिं प्राप्नुवन्ति।

यज्ञ तपआदीनि मोक्ष साधनानि कथितानि परं बिना ज्ञानेन तैरेव मोक्ष साधनं नैव सम्पाद्यते यथा भोजनपाकार्थं संग्रहीतानि द्रव्याणि बिना वह्नि संयोगेन नैव पाकं यान्ति, तथैव विना ज्ञानेन सर्व मोक्ष साधनानि निष्फलानि भवन्ति इति पूज्यपादशंकराचार्येण गदितम्।

अपरेण उदाहरणेन आचार्येण उपर्युक्त सिद्धान्तस्य पुष्टिः कृता। यथा विना ज्योतिः कोऽपि अन्धकारं न निहन्ति तथैव विना विद्यया ज्ञानेन वा अविद्यां नैव निहन्ति।

अहं मनुष्यः देहमात्रः इति ज्ञानं अविद्या संयुतम्। अहं शुद्धः बुद्धः नित्यमुक्तः इति ज्ञानमेव विद्या इति भण्यते सा विद्या एव मुक्तये सुविदिता प्रतिपादिता विद्वज्जनैः।

अपरञ्च जीवब्रह्मतत्वयोः ऐक्यज्ञानं एवं आत्मबोधो मुक्तिः इति प्रसिद्धम्। अन्योपायेन आचार्येण उक्तसिद्धान्तः प्रतिपादितः। यथा मेघपुञ्जेन आवृतः सूर्यदेवः न प्रकाशते। मेघापाये सति स एव अंशुमान सर्वं प्रकाशयति। तथैव अविद्याऽऽवरणापाये सति आत्मा स्वयमेव प्रकाशते।

उक्त सिद्धान्तस्य पुष्टिः श्रीमद् गीतानुसारं अपि सिध्यति। ''ज्ञानाग्निः सर्व कर्माणि भस्मसात् कुरुते इति जगद्गुरुणा श्री कृष्णेन अर्जुनाय समुपदिष्टम्।'' तथैय विद्यया ज्ञानेन च अविद्यानाशः तदुपरान्तं विद्या स्वयमेव अंशुमान रव प्रकाशते।

इति आचार्यशंकत मोक्षसाधने विस्तरेण व्याख्यातम्।।

पूर्व अतिरिक्त निदेशकः
आयुर्वेद विभाग राजस्थान

# विनायकसहस्र सिद्धे

(गताङ्कादग्रे)

❑ पं. राजेन्द्र मोहनशर्मा

अहं लक्षश्च द्वावपि पादौ संकोच्य अर्धविस्तीर्णे आस्तरणे पूर्णां रात्रिं शरीरे परिवर्तनं कुर्वन्तावेव अगमयेताम्। सहसा विनायक: मूषकस्य स्कन्धे सुदृढं हस्तं संस्थाप्यावदत् अत एवाहं कथयामि भोजने न्यूनता विधेयेति। भवतामाकृतिस्तथा वर्धते येन ऐरावतोऽपि लज्जितोऽजायत। मूषक उच्चैर्जहास-अवदच्च भवन्तस्तु जानन्त्येव स्वादिष्टं भोजनं श्रेष्ठानि फलानि मह्यं समधिकं रोचन्ते एष एव मम दुर्बल: पक्ष:। पुन:-उपालम्भं ददत्-अकथयत् किमहं कुर्यां यदा कोऽपि भवतां स्थाल्यां बाहुल्येन समधिकं स्वादिष्टं व्यञ्जनं परिवेशयेत्तदा भवान् तु केवलं स्वल्पमेव खादति जिघ्रति वा तदा नाहं तस्य विपुलभोजनस्यापमानं कर्तुं शक्नोमि अतएव त्वदीयो भावो मया खाद्यते। तस्य कथनं श्रुत्वा पार्श्वस्था गणा अपि उच्चैर्जहसु:।

विनायक: संप्रति भवान् शीघ्रं सन्नद्धो भवतु। शीघ्रं तत्र गन्तव्यं यत्र स्त्री पुरुष बालक वृद्धदिव्याङ्ग दृष्टिहीन-जनानां समूह: केवलं भवत्कृते-औत्सुक्येन तस्मिन्नेव मार्गे उपविष्टा: सन्ति य: सर्वथा भवतां द्वारे-उद्घाटितो जायते।

विनायक: समधिकमनुनयं विनयञ्चकार परन्तु मूषकलक्षावन्यगणानामागमनानन्तरमेव विनायकं मध्ये कृत्वा शोभायात्रारूपेण (जूलूस) अग्रे अवर्धन्त। विनायको द्वारात् बहि: समधिकं जानुपर्यन्तं विनम्रो भूत्वा द्वारात् बहि: समागच्छत्। सैषा स्थिति: सर्वेषामेव सहयात्रिणामविद्यत। मूषकस्तु न केवलं निम्नो जात: अपि तु तिर्यगन्तं संजात: तदैव बहिरागन्तुमशक्नोत्। कक्षतो बहिरागत्याथ सर्वत: प्रथमं विनायक: सम्मुखे अपश्यत् यावद् दूरं तदीया दृष्टिरगच्छत् तावत् पर्यन्तं नैकरंगवस्त्रधारिण: पर्णलतापत्रवृक्षाणां त्वचां पशुचर्मधारिणो जना: समतिष्ठन् यथैव ते विनायकं तदीयं दलं चापश्यन् तदा सर्वे चिंघाडा चीत्कारेण सह हर्षध्वनिना स्वागतं व्याजह्रु:।

विनायकायाश्चर्यकरमिदं स्वागतमविद्यत। अधुनापर्यन्तं यस्मिन् परिवेशे तेऽतिष्ठन् तत्र करतलध्वनिशरीरस्यार्ध-चन्द्राकारस्वरूपेण सह अतिथिस्वागतमसावपश्यत्। यथा यथा विनायकस्तदीया: सहचराश्च अग्रे अवर्धन्त तथा तथा कोलाहल: हर्षातिरेकस्वरा: विभिन्नवाद्ययंत्राणां सामूहिक: स्वरो गगनमस्पृशत्। पशु पक्षिगणा अपि यत्रासन् तत्रैव स्तब्धा: वातावरणमन्वभूवन् स्थिरा भूत्वा विनायक: साकं चलन्तं मूषकमपृच्छत् किमिति मदीयां स्थितिं विचित्रां भवान् कारयति। परन्तु मूषक: उत्तरमप्रदाय सम्मुखे शिलाखण्डस्य द्वितीये भागे स्थापितां विविधां खाद्यसामग्रीं प्रति इङ्गितं चकार।

विनायकस्तं गभीरदृष्ट्या-अपश्यत्। अस्मिन्नेवान्तराले विनायकपाद: मूषकेऽपतत्। स च खीं खीं शब्दं कुर्वेन् पङ्क्तयैव साकमचलत्। लक्ष इङ्गितेन मूषकमबोधयत् नायं परिहाससमय:।

विनायको मन्थरगत्या कदाचित् धरणीं कदाचिच्च गगनं पश्यन् अग्रे प्राचलत्। कक्षत: शिलाखण्डस्य (दूरी) संभवत: पंचशतं कीचकमिता स्यान्नाम। परन्तु एतावन्तं मार्गं प्रचलने पूर्णतश्चतुर्घटिकासमयो व्यतीत:। यतोहि मार्गे स्त्रियो नृत्यन्तिस्म विभिन्नैं वाद्ययन्त्रध्वनिभि: सह विनायकस्य तदीय सहचराणां च स्वकीयशुभ्रै: भावनाभि: स्वागतमाचरन्। इत्थं क्रमश: उभयत: स्थितै: उपसमूहै: स्वागतक्रम: प्राचलत्। अस्मिन्नन्तराले काननस्य विविधपुष्पाणां वृष्टिरपि निरन्तरं प्राचलत्। यदा सूर्यो मस्तके समागच्छत् तदा आदिनायक: शिलाखण्डात् विशेषप्रकारकमेकं वाद्ययन्त्रं यस्याग्रभागो गगनं प्रति समुत्थितोऽविद्यत शेषाश्चत्वार: शिराश्चतुर्षु दिक्षु अभ्रमन् उत्थाप्य स कपोलमुत्फुल्य तस्मिन् वायुमपूरयत्।

वातावरणे कर्णप्रिय: सुमधुरो ध्वनि: अगुञ्जत नायक: पूर्णशक्त्या संगीतस्वरमसाधयत्। नायकस्यैकवारं संगीत-प्रवाहानन्तरं शेषोपसमूहे वाद्ययन्त्रधारिणो: स्त्रीपुरुषयो: युग्मकं सर्वश्रेष्ठं ध्वनिं प्रासारयत्। प्रतीयतेस्म-अस्य पर्वतीयप्रदेशस्य सर्वे वृक्षा: लता: कीचकसमूहा: विभिन्नपक्षिणां कण्ठध्वनि श्चागत्य यन्त्रेषु समुपाविशत्। मन्ये

विनायकस्वागते परस्परं स्पर्धया मधुरां स्वरलहरीं प्रस्तुवन्ति। स्वराणामियं स्पर्द्धा नहि अन्योऽन्यं खण्डयतिस्म। यस्मात् स्थानात् एकः स्वरो वाद्यसमूहेभ्यः निस्सरन् अग्रे अवर्धत तत एव अन्येषां वाद्यसमूहानां स्वरस्तेषां हस्तं गृहीत्वा ग्रेऽवर्धत। विनायकः स्वयं प्राकृतसंगीतस्य पशुपक्षिणां कलरवगानस्य च सम्यग् ज्ञाता-अविद्यत, अनेनाद्‌भुतेन स्वरसमूहेन आश्चर्य-चकितोऽभूत्। यस्मिन् उल्लासः आसीत् विनयोऽविद्यत अतिथिस्वागताय विशेषप्रकारस्याग्रहोऽविद्यत।

आदिनायकः स्ववाद्ययन्त्राणि सहचराय दत्वा धावन् विनायकपार्श्वेऽतिष्ठत्। स स्वकीयौ द्वौ हस्तौ-ओष्ठे संस्थाप्य स्वकीयतर्जिन्या विशेषमेकं ध्वनिमुच्चरयत्। ततश्च सर्वे वनवासिनस्तमन्वसरन्। विनायको द्वाभ्यां हस्ताभ्यां नायकं प्रत्यग्रहीत्। मन्दस्मितेन युक्तो तेन सह प्राचलत्। विनायको तदीयसहचराणां समूहाश्च शनैः शनैश्चलन्तः शिलाखण्ड-सिंहासन समीपमगच्छन् किञ्चित् स्थित्वा विनायकः क्रमशः सर्वानपश्यत्। विनम्रो भूत्वा तेषामभिवादनं स्वीचकार। विनायकस्य चञ्चलां किन्तु चित्तकर्षिकामिमां मुद्रां दृष्ट्वाएकदा पुनः जनसमूहोऽध्वनत्। अन्ते नायकः सर्वानुपवेष्टु-मिङ्गितवान्।

नायकस्याग्रहेण विनायकः शिलाखण्डमध्ये उन्नते प्रस्तरासने उपाविशत् क्रमशः नायकस्य सर्वे सहचरास्तत्पृष्ठे अतिष्ठन्। परन्तु मूषको लक्षश्च विनायकस्य पार्श्वभागे अतिष्ठताम्। नायकोऽवदत् भो अतिथि! वयं भवतः कृतज्ञाः स्मः। भवन्तोऽस्माकं सहचरैः सह चिरात् प्रचलितायाः समस्यायाः समाधानमकुर्वन्। अस्माकं बालकेभ्यः पोषणस्य पल्लवनस्य च मार्गः प्रशस्तो विहितः वयं न जानीमः को भवान्? कुतः समागतः कुत्र च गमिष्यति? परन्तु एतावत् जानीमो यत् भवानस्मभ्यं चिरप्रतीक्षितघनवृष्टिरिव विद्यते। वृष्टितः स्मरामः यद् वयं विगतनैकदशकेभ्यः अस्य पर्वतस्य कन्दरासु निवसामः किन्तु अस्माकं शिशवः स्त्रियो वृद्धाश्च भोजनाय काननस्य पादपेषु वृक्षेषु च निर्भराः विद्यन्ते। अत्र वृष्टिस्तु प्रचुरमात्रायां भवति परन्तु बिन्दुमात्रमपि जलं न तिष्ठति अतः एषु शिलाखण्डेषु न किमपि उत्पद्यते। वयं पथिकेभ्योऽशृणुम अथवा यदा कदा गन्तृभ्यः सन्तेभ्यः अजानीमो यत् धान्यतण्डुलान्नानामनेके प्रकाराः विद्यन्ते। अन्यक्षेत्रनिवासिनोऽस्मत् सदृशा जनाः सारल्येन धान्यादीनुत्पादयन्ति ततश्च तेभ्यः आत्मानं पुष्णन्ति।

मूषको नायकमपश्यत्। तस्य ध्यानं पौनपुन्येन खाद्यपदार्थान् प्रति गच्छतिस्म येषां गन्धस्तदीय नासिकायां प्रविशंतिस्म उदरे च चाञ्चल्यं जायतेस्म। इच्छतिस्म यत् नायकः स्वप्रवचनं शीघ्रं समापयेत्। ततश्चावशिष्टाः औपचारिकताः शीघ्रं पूर्णा भवेयुः। तदा भोजनसामग्रीमुरस्थां कुर्याम्। लक्षः स्मित्वा विनायकमपश्यत्। विनायको घूर्णयन् मूषकमभर्त्सयत्। मूषकः पुनः सरलोभूत्वा अतिष्ठत्।

नायकोऽग्रेऽवदत्। अस्माभिः पथिकेभ्यः सन्तजनेभ्यश्च बीजान्यपि समधिगतानि। परन्तु अस्माकं प्रयासः सफलो नाभवत्। भो! अतिथि न केवलं भवन्तः भवतां सहचराश्च अस्माभिः सह उषित्वा समययापनं विधाय अस्मान् धानोत्पादनकलामाशिक्षयन् अपितु भवदीयसहचराः सारल्येन सम्पूर्णं पर्वतप्रदेशमुत्पादनयोग्यां विहिता। अद्यास्माकं प्रान्ते यानि सोपानतुल्यानि क्षेत्राणि विद्यन्ते तानि सदैव भवन्तं स्मारयिष्यन्ति।

अधुना भवतां सर्वेषामनुमत्या अतिथेरभिवादनं सम्मानं च चिकीर्षामि। विनायकः, शिरसा स्वीकृतिं प्रायच्छत्। तदनन्तरं स्त्रीसमूहाः क्रमशः मृत्कलशेषु पृथक् पृथक् नदीभ्यः कासारेभ्यः समानीतेन सुरभितेन पयसा विनायकस्याभिषेकं चक्रुः। विनायकः पद्मासनमुद्रायां स्थित्वा नेत्रे निमील्य स्वद्वौ हस्तौ जङ्घासु संस्थाप्य तर्जनीद्वारा-अंगुष्ठेन च विशिष्टां मुद्रामरचयत्। बहुकालं यावत् सुगन्धित जलस्नानानन्तरं क्रमशः पयसा दध्ना (शहद) मक्षिकेन इक्षुरसेन घृतेन चाभ्यसिञ्चन्। घृतदधिशर्करामधुरदुग्धमिश्रितं पञ्चामृतं इक्षुगन्धेन वर्णेन (रङ्गतः) स्वकीयां प्रसन्नतामायोज-कान् प्रसन्नतातुल्यां प्रसन्नतां व्यनक्तिस्म।

**( प्राचार्य )**
**पुरानी बस्ती, चांदपोल बाजार, जयपुर**

# महाकवेर्बाणभट्टस्य चिन्तने कविः काव्यं च

❑ गजेन्द्रकुमारः कांसोटिया

संस्कृतगद्यकारेषु ख्यातनामा महाकविर्बाणभट्टः कवित्वस्यापि सुपरीक्षकः आसीत्। हर्षचरिते स्वकीयं कवित्वविषयकं दृष्टिकोणं प्रस्तौति। स उल्लिखति यत् कवयः सामान्यतो द्विविधा भवन्ति कुकवयः उत्पादककवयश्च। कुकवीनां विषये तेन लिखितम् अस्ति-

**''प्रायः कुकवयो लोके रागाधिष्ठितदृष्टयः।**
**कोकिला इव जायन्ते वाचालाः कामकारिणः।।''**[1]

अनेनोल्लेखेन स्पष्टीभवति यत् ये कवयः रागम् अर्थात् अनर्थाभिनिवेशं लक्ष्यीकृत्यैव रचनायां तत्परा भवन्ति। येषां दृष्टिः यथार्थं न पश्यति केवलं कल्पनामाश्रित्यैव सर्जनां कुर्वन्ति। ये वाचालत्वात् पाण्डित्यप्रदर्शनाय शब्द-योजनामात्रं कुर्वन्ति। ये कामकारिणः केवलं शृंगार-मेवावलम्ब्य यत्किंचिज्जल्पन्ति किन्तु रसादितत्वानां गूढतां महत्तां च न जानन्ति, ते कुकवय इत्युच्यन्ते।

बाणभट्टस्य काले एतादृशानां कवीनां संख्या भूयसी आसीत्, किन्तु उत्पादकानां कवीनां नैयून्यमासीत्। यथा सः प्रवक्ति तत्रैव हर्षचरिते-

**''सन्ति श्वान इवासंख्या जातिभाजो गृहे गृहे।**
**उत्पादका न बहवः कवयः शरभा इव।।''**[2]

ये कुकवयः सन्ति ते जातिभाजः सन्ति। अर्थात् ते तादृशस्वभाववन्त एवासन्। तेषां स्वभाव एवैतादृशोऽस्ति येन ते तादृशीं रचनां विधाय आत्मानं धन्यं मन्यन्ते। तदतिरिक्तं ये बहुशास्त्रज्ञा लोकव्यवहारविज्ञा प्रतिभा-शालिनश्च वर्तन्ते ते उत्पादकाः कवयः सन्ति। वस्तुतस्तु एव किमपि नूतनमुत्पादनं विधाय विद्वज्जनानां पुरः प्रस्तुवन्ति काव्यम्।

एवं बाणभट्टमते काव्येऽपि नावीन्यमपेक्षितमस्ति। एवं प्रतीयते यत् बाणभट्टः कवित्वे नवाचारस्य पक्षपाती आसीत्। स अस्य मार्गमप्यस्मभ्यं दर्शितवान् तथा हि आदौ प्राचीनां कवित्वपरम्परां निर्दिश्य नूतनं युगस्यावश्यकतानु-रूपं किंविधं कवित्वं साम्प्रतमपेक्षमाणमस्तीति सन्दर्शयति

**'श्लेषप्रायमुदीच्येषु प्रतीच्येष्वर्थमात्रकम्।**
**उत्प्रेक्षा दाक्षिणात्येषु गौडेष्वक्षरडम्बरम्।।'**[3]
**''नवोऽर्थो जातिरग्राम्या श्लेषोऽक्लिष्टः स्फुटो रसः।**
**विकटाक्षरबन्धश्च कृत्स्नमेकत्र दुष्करम्।।''**[4]

अर्थात् बाणभट्टस्य काले भारतवर्षे औदीच्या श्लेषमयानि काव्यानि रचयन्ति स्म प्रतीच्या अर्थगौरवमयानि काव्यानि रचयन्ति स्म, दाक्षिणात्या उत्प्रेक्षाद्यलंकारालं-कृतानि काव्यानि रचयन्ति स्म पूर्वदेशीया गौडादिदेशवा-सिनः अनुप्रासादिविशिष्टानि काव्यानि रचयन्ति स्म। तदानीं बाणभट्टः स्वसूक्ष्मेक्षिकया कीदृशं नूतनं काव्यं मया रचनीयमिति चिन्तनं विधाय निर्णीतवान् यत् नवनवार्थपूर्णम् अभिनवप्रकृतिकं, सहजश्लेषाद्यलंकारमयं सर्वथारसमयं, विशिष्टपदयोजनात्मकं काव्यं रचयितुं मतिं चक्रे। यतोहि एतादृशं काव्यं लोके विशिष्टं स्यात्।

नवाचारस्य अपेक्षामयेऽद्यतनीये युगेऽपि बाणभट्टात् प्रेरणां ग्रहीतुं शक्यते। यदि कश्चन कविः मया पूर्वापेक्षया किंचिन्नूतनं कवनीयमिति दृष्टिकोणं निर्माय चिन्तनपूर्वकं किमपि काव्यविशेषं रचयितुं प्रवर्तते तदैव नवाचारः सफलतां प्राप्तुं शक्नोति। नवाचारस्य किमपि सुस्थिरं स्वरूपं नास्ति।

काव्यान्तराणामनुकरणं नवाचारं नास्ति। वर्तमाने भाषान्तरकाव्यरचनां दृष्ट्वा संस्कृतेऽपि तादृशरचनायै तत्परा केचन विद्वांसः तं नवाचारं ब्रुवन्ति। तदपार्थमेवास्ति। बाणभट्टः एतादृशकार्यकर्त्तारं चौरकविशब्देन सम्बोधयति। लिखति च-

**''अन्यवर्णपरावृत्या बन्धचिन्हनिगूहनैः।**
**अनाख्याता सतां मध्ये कविश्चौरो विभाव्यते।।''**[5]

कवित्वविषये बाणभट्टस्य लक्ष्यं परमोदात्तम् असंकीर्णं च वर्तते। तथा हि सः युगापेक्षि काव्यं कालजयिरूपेण

रचयितुं कामयते। अर्थात् तदेव काव्यं वस्तुतः काव्यम् अस्ति यत् युगयुगान्तरं यावत् लोकान् बोधयितुं सक्षमं स्यात्। लोकस्य सर्वेषाम् आचार-व्यवहारविषयाणां समावेशस्तत्र स्यात्। यदि कविः एतादृशं काव्यं न रचयति तर्हि तस्य कवेः तद्रचनायाश्च किमपि मूल्यं नास्ति। यथा लिखति बाणभट्टः -

**''किं कवेस्तेन काव्येन सर्ववृत्तान्तगामिनी।**
**कथेव भारती यस्य न व्याप्नोति जगत्रयम्।''**[6]

यदि वयं बाणभट्टस्य रचनानामवलोकनं कुर्मस्तदा इदं महत्वपूर्णं तथ्यमपि जानीमो यत् बाणभट्टकवित्वे समन्वयवादस्यापि आकांक्षा आसीत्। तथा हि सः पूर्वकवीनां पृथक् पृथक् क्षेत्रेषु कवित्वप्रवृत्तिं दृष्ट्वा तेषु यथापेक्षितानि क्षेत्राणि च गृहीत्वा स्वककवित्वस्य नूतनं क्षेत्रं निर्धारितवान्। आधुनिकरचनाधर्मिणोऽपि बाणभट्टेन विषयेऽस्मिन् प्रेरणां ग्रहीतुं शक्नुवन्ति।

बाणभट्टस्य कवित्वे कुत्राप्येकांगित्वस्य दृष्टिकोणं नैव लक्ष्यते। कवित्वे एकांगित्वसर्जनपरम्परायाः प्रवृत्तिं उन्मूलयितुमेव बाणभट्टः सर्वगुणसम्पन्नां रचनां कर्त्तुकामः प्राभवत्। बाणभट्टः वाग्वैदग्धस्याप्याकांक्षी आसीत्। तन्मते कवित्वं तदेव सफलं भवति, यत्र वाग्विच्छित्तिः स्यात्। यथोक्तं तेन -

**''उच्छ्वासान्तेऽप्यखिन्नास्ते येषां वक्त्रे सरस्वती।**
**कथामाख्यायिकाकारा न ते वन्द्याः कवीश्वराः।।''**[7]

बाणभट्टः कवित्वे यान्यन्यानि तात्वानि महत्वपूर्णानि मन्यते तेषु कानिचित् हर्षचरिते उल्लिखितानि सन्ति यथा- पदलालित्यम्। पदलालित्यं काव्ये कलात्मकतायाः रमणीयं सोपानमस्ति। काव्यं प्रति तद्वशादेव पाठकानाम् आकर्षणमपि सम्भवति। रसोत्कर्षेऽपि पदलालित्यस्य भूमिकया तद् ग्राह्यता वांछनीयाऽस्ति। बाणभट्टः विषयेऽस्मिन् भट्टारहरिचन्द्रं स्मरति सादरम्-

**''पदबन्धोज्ज्वलो हारी कृतवर्णक्रमस्थितिः।**
**भट्टारहरिचन्द्रस्य गद्यबन्धो नृपायते।।''**[8]

यथा चासौ पदलालित्यं वांछनीयं मनुते तथैव ग्राम्यत्वादिदोषशून्यत्वमपि अपेक्षितं ब्रवीति। अस्मिन् विषयेऽयं सातवाहनं स्मरति। निर्दुष्टकवित्वस्योपक्रमे एव प्रवरसेनं प्राकृतकाव्यरचयितारं च स्मरति। नाटककारं भासं च स्मरति। एवमेव सूक्तिप्रयोगमपि बाणभट्टः कवित्वे स्थानं प्रददाति अस्मिन् विषये च कालिदासं प्रशंसति-

**''निर्गतासु न वा कस्य कालिदासस्य सूक्तिषु।**
**प्रीतिर्मधुरसान्द्रासु मंजरीष्विव जायते।''**[9]

एवं बाणभट्टस्य कविविषयकं काव्यविषयकं च चिन्तनं सविशेषमस्ति। काव्यरचनाकाराणां दृष्टिकोणे वैशद्यमुद्भावयितुं बाणभट्टस्य प्रयत्नोऽपि नितरां प्रशस्योऽ-स्ति। कवित्वस्य विषये तदीयं चिन्तनं कादम्बर्यामपि उल्लेखनीयमस्ति। तत्राप्यसौ ''उत्कृष्टकविगद्यमिव विविध-वर्णश्रेणि प्रतिपाद्यमानाभिनवार्थसंचय'' मित्युक्त्वा। काव्येऽर्थगौरवस्याप्यपेक्षां सूचयति। रसस्यापरिहार्यता चाप्यनेन स्वीकृता। गद्ये पद्ये चोभयत्र कवित्वं रससिक्तं स्यादिति बाणभट्टः कामयते। उल्लिखति च-

**''स्फुरत्कलालापविलासकोमला**
**करोति रागं हृदि कौतुकाधिकम्।**
**रसेन शय्या स्वयमभ्युपागता**
**कथा जनस्याभिनवा वधूरिव।।''**[10]

बाणः स्वयं रससिद्धकविः आसीत्। कवित्वस्य च सम्यग् विज्ञाता पर्यवेक्षकश्चावर्तत। अतएव बाणभट्टेन कवित्वस्य विषये यो दिशानिर्देशः कृतः सोऽस्माक-माधुनिकानां कृते परमोपादेयोऽस्ति। वस्तुतः तदीयचिन्तनेन रचनाधर्मितायाः सन्दर्भे पर्याप्तं मार्गदर्शनं लब्धुं शक्यते इत्यत्र नास्ति सन्देहः।

1. हर्षचरितम् 1/4, 2. हर्षचरितम् 1/5, 3. हर्षचरितम् 1/7,8, 4. हर्षचरितम् 1/6, 5. हर्षचरितम् 1/9, 6. हर्षचरितम् 1/10, 7. हर्षचरितम् 1/12, 8. हर्षचरितम् 1/16, 9. कादम्बरी पृ. 113, 10. कादम्बरी 1/8

**शोधच्छात्रः**
**राजस्थानविश्वविद्यालयः, जयपुरम्**

# ऐतिहासिकमहाकाव्यद्वयम्-रामायणं महाभारतञ्चेति

❑ गणेशनारायणस्वामी

काव्यं नाम कविनिर्मितं शब्दार्थोभयनिष्ठं रसात्मकं सहृदयहृदयवेद्यमाह्लादकरं किमपि वस्तु। वस्तुतः काव्येषु प्राचीनकालादेव अप्रतिमचरित्राणां स्तुतिगान-परम्परा प्राप्यते। ऋग्वेदे इन्द्रदेवस्य यशोगानमेतस्य प्रत्यक्षनिदर्शनमस्ति। रामायणं महाभारतञ्चेति काव्यद्वयमपि वीरगाथाकाव्यरूपेण जगति प्रथितम्। परवर्तिसंस्कृतसाहित्यस्योपजीव्यकाव्यतया एतयोर्महत्वं सर्वविदितमेव। महाकाव्यस्य प्रारम्भिकरूपमत्रै-वोपलभ्यते। कालिदासतः पूर्ववर्तिमहाकाव्येषु रामायणं महाभारतचेति ऐतिहासिकमहाकाव्यद्वयस्य स्मरणं सर्वप्रथमं क्रियते ।

## रामायणम्

पञ्चशतईस्वीयवर्षपूर्वं आदिकविवाल्मीकिमुनिना विरचितस्य रामायणस्यार्षकाव्यरूपेण आख्यानमस्ति। अस्य गणनाऽऽदिकाव्यत्वेनापि क्रियते। महाभारतमिव काव्यमिदमप्युपजीव्यकाव्यमस्ति। आधुनिकविचार-काणां दृष्टौ विकासशीलत्वेन महाकाव्यस्य गणना। लौकिकसंस्कृतकाव्यधारायाः प्रथमावतारः महर्षि-वाल्मीकिरेव। अस्य प्रमाणमेकया घटनया ज्ञायते। सा च प्रकरणेनानेनावलोकयितुं शक्यते-

**मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः।**
**यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम्।।**

पक्षिवधात् व्याकुलेन मुनिना स्वमुखात् शोकवशात् निर्गतश्लोकस्य विषये अनन्तरं विचिन्त्य स्व-शिष्यं प्रत्युक्तम् -

**पादबद्धोऽक्षरसमस्तन्त्रीलयसमन्वितः।**
**शोकार्त्तस्य प्रवृत्तो मे श्लोको भवतु नान्यथा।।**[1]

तदनन्तरं ब्रह्मणः दर्शनेन रामायणवृत्तान्तस्य प्रतिपादनं जातं तथा मुनिना रामायणस्य रचनायै प्रेरणा समुपलब्धा ।

वाल्मीकिना कृतं रामायणस्य कथावस्तु सर्वेभ्यो आर्षग्रन्थेभ्यः अन्यतमं रमणीयञ्चास्ति। काव्यसौन्दर्यं प्रतिपादयताऽऽनन्दवर्धनेन ध्वन्यालोकस्य प्रथमे उद्योते रस-ध्वनि-काव्यात्मकत्वेन रसरूपत्वेन विद्यमानः रस एवात्मा यस्य तदेव काव्यप्रतीयमानत्वं काव्यात्मत्वम्-

**काव्यस्यात्मा स एवार्थस्तथा चादिकवेः पुरा।**
**क्रौञ्चद्वन्द्ववियोगोत्थः शोकः श्लोकत्वमागतः।।**[2]

पुराकाले क्रौञ्चद्वन्द्ववियोगेन जनितः आक्रन्दः श्लोकत्वेनागतः । रामायणमाधारीकृत्य क्रौञ्चप्रसङ्गः परम्परया स्वीक्रियते। नास्त्यत्रापि मतैक्यं सर्वेषां विदुषाम्। ध्वन्यालोकलोचनयोः क्रमेण **''निहत-सहचरीविरहकातरक्रौञ्चाक्रन्दजनितः''**[3] तथा च **''क्रौञ्चस्य द्वन्द्ववियोगे सहचरीहननोद्भूतेन''**[4] अनयोः 'सहचरी' इत्यस्य स्थाने 'सहचरः' इत्यस्य पाठेन स्वीक्रियन्त इति ।

अनेन कथनेन स्पष्टीभवति यत् वाल्मीकिना स्वयमेव स्थायिशोकत्वेन करुणरसस्य प्रतिपादनं कृतम्। तथा च सीतायारात्यन्तिकवियोगत्वेन स्वकाव्य-स्य निर्माणं कृत्वा तस्य निर्वाहः सम्यक्तया कृतमिति। तस्माद्रामायणस्याङ्गीरसः करुणः एव सर्वथोचितः परिलक्ष्यते। रामायणमुपजीव्यत्वेनाधारीकृत्य भवभूति-कालिदासाभ्यां रामायणस्य गाढानुशीलनं कृतमिति दृश्यते। कालिदासः वस्तुतस्तु श्रृङ्गारिकः परञ्चाऽ-जविलापप्रसङ्गे यथा करुणरसस्य पाकः प्रस्तुतः, तेन तत्रापि प्रभावशीलता दर्शितं करुणस्य। उत्तररामचरिते करुणरसस्य पराकाष्ठा प्रतिपादिता भवभूतिना। भवभूतेरेव वैदग्ध्यभावोऽयमस्ति -

1. रामायणम् 1/2/8, 2. /ध्वन्यालोकः 1/5, 3. ध्वन्यालोकः 1/5 कारिकावृत्तिः 4. ध्वन्यालोकः 1/5 वृत्तिः लोचनटीका

**''अपि ग्रावा रोदित्यपि दलति वज्रस्य हृदयम्''**[1]

इति ।

बाल-अयोध्या-अरण्य-किष्किन्धा-सुन्दर-युद्ध-उत्तरेतिनामकेषु सप्तकाण्डेषु निबद्धस्यास्य महा-काव्यस्याधोलिखिताः पाठाः प्राप्यन्ते-

1. दाक्षिणात्यपाठः 2. गौडीयपाठः
3. पाश्चात्यपाठः 4. काश्मीरकपाठः

## महाभारतम्

महर्षिणा वाल्मीकिना कृतं यथा रामायणं तथैव कृष्णद्वैपायनेन (व्यासेन) विरचितस्य महाभारतस्य स्थानमेतिहासिकरूपेणार्षरूपेण चापि विश्वेऽस्मिन् महत्त्वपूर्णम्। भगवता द्वैपायनेन श्रुतिपरम्परायाः निर्वाहं कुर्वता वेदानां विस्तारः कृतः तस्माद् वेदव्यास इति प्रथितः। बादरायणनाम्नापि केचन व्यवहरन्ति। भारतीयपरम्परायां महर्षिवेदव्यासस्य गणना सप्तचिरञ्जीविषु कृता यथा -

**अश्वत्थामा बलिर्व्यासो हनूमांश्च विभीषणः।**
**कृपः परशुरामश्च सप्तैते चिरजीविनः॥**

भारतीयलौकिकसाहित्ये महाभारतस्य स्थानं रामायणवदस्ति । अस्य ग्रन्थस्य विषयस्य व्यापकतायाः आकारस्य च विशालतायाः विषये सम्यगेवोक्तम्-

**महत्त्वाद् भारवत्वाच्च महाभारतमुच्यते।।**[2]

अस्मिन्नुपन्यस्तविषयाणां क्षेत्रम् एतादृशं विस्तृतं, वैविध्यपूर्णञ्चास्ति यत् व्यासोक्तकथनमिदं युक्तियुक्तमेव प्रतिभाति -

**धर्मे चार्थे कामे च मोक्षे च भरतर्षभ।**
**यदिहास्ति तदन्यत्र यन्नेहास्ति न तत्क्वचित्॥**[3]

महाभारताय विभिन्नानि नामानि विद्वद्भि-र्निर्दिष्टानि। तेषु काव्यं, जयः, भारतं, महाभारतं, कार्ष्णवेदः, शतसाहस्रसंहिता इति प्रसिद्धानि सन्ति। महाभारताय जयनामोल्लेखः बहुषु स्थलेषु प्रयुक्तः। अस्य ग्रन्थस्याद्यश्लोकेन एव महाभारतस्य जयेति नाम्नः परिचयं प्राप्यते -

**नारायणं नमस्कृत्य नरं चैव नरोत्तमम्।**
**देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत्॥**[4]

अपि च -

**जयनामेतिहासोऽयं श्रोतव्यो विजिगीषुणा।**[1]

केषांचन विदुषां मतानुसारेण साम्प्रतिके विद्यमानं महाभारतमस्ति विस्तृतरूपं जयकाव्यस्यैव। महाभारतस्य विकासक्रमः त्रिस्तरेषु परिलक्ष्यते-जयः, भारतं महाभारतञ्च। प्रारम्भे संक्षिप्ता मूलकथा परञ्च कालान्तरेण जगतः परिवर्तनं यथा तथैवात्र। केचन स्वीकुर्वन्ति जयकाव्ये अष्टाशीतिसहस्रात्मकानि पद्यानीति । तद्यथा-

**अष्टौ श्लोकसहस्राणि अष्टौ श्लोकशतानि च।**
**अहं वेद्मि शुको वेत्ति सञ्जयो वेत्ति वा न वा॥**[2]

खिलपर्वणः संयोजनेन अस्य पद्यानां शत-सहस्रात्मकता जाता।

आदि-सभा-वन-विराट-उद्योग-भीष्म-द्रोण-कर्ण-शैल्य-सौप्तिक-स्त्री-शान्ति-अनुशासन-आश्वमेधिक-आश्रमवासिक-मौसल-महाप्रास्थानिक-स्वर्गारोहणेति अष्टादश-पर्वषु निबद्धं महाकाव्यमिदं भारतीयसंस्कृतेः प्राणत्वेन विद्यमानमस्ति। खिल-पर्वनाम्नापि महाभारतस्य परिशिष्टभागस्योल्लेखः प्राप्यते। एतस्य महाकाव्यस्य रचनाकालः ईसातः पचशतवर्षपूर्वं मन्यते । महाकाव्यमिदं अधर्मे धर्मस्य, असत्ये सत्यस्य विजयत्वेनानुप्राणितमस्ति। धर्म-तत्त्वज्ञानकोशत्वेन भाति विश्वस्य। महर्षिवेदव्यासस्य कथनं यत् धर्मस्य परित्यागः कस्यामपि दशायां भयात् लोभात् वा नैव कर्त्तव्यमिति-

1. उत्तररामचरितम् 1/28, 2. महाभारतम्, आदिपर्व 1/274
3. महाभारतम्, आदिपर्व 62/53

4. महाभारतम्, आदिपर्व 1/1
1. महाभारतम्, आदिपर्व 42/20
2. महाभारतम्, आदिपर्व 1/81

**न जातु कामान्न भयान्न लोभात्।**
**धर्मं त्यजेज्जीवितस्यापि हेतोः॥**
**धर्मो नित्यः दुःखसुखे त्वनित्ये।**
**जीवो नित्यो हेतुरस्य त्वनित्यः॥**[3]

महर्षिकर्मवादिनः कर्मैव मानवस्य लक्षणम् । कर्मणः पराङ्मुखः मानवः नैव शोभते मनुष्यत्वेन –

**प्रकाशलक्षणा देवा मनुष्याः कर्मलक्षणाः।**[4]

पुरुषार्थ एव तस्योन्नायकः। हस्तसिद्धजनानां सर्वसिद्धः। महाभारतकारस्य राष्ट्रभावनाऽऽतीवोदात्ता, विशुद्धा, ओजस्विनी च । नृपे राष्ट्रस्य केन्द्रम् । नृपः प्रजातन्त्रयुगस्य अधिनायकानां दुर्गुणेभ्यः सर्वथा मुक्तो भवति ।

राजतन्त्रस्य विनाशे राष्ट्रस्य विनाशः। साम्प्रतिक-राजनायकेषु महाभारतमेकं विलक्षणादर्शः समुपस्थापयति ।

3. महाभारतम्, उद्योगपर्व 40/12-13
4. महाभारतम्, आश्वमेधिकपर्व 43/27

**शोधच्छात्रः**
**साहित्यविभागः,**
**ज.रा.रा.सं.विश्वविद्यालयः, जयपुरम्**

# श्रीरामसा-स्तुतिः

**( श्रीद्वारकानाथो विजयते )**

❑ **आचार्य पं. नथमलशास्त्री दाधीचः**

अलौकिकैश्चमत्कारैर्दिव्यैश्च बहुचर्चितः।
''रूणीचा'' सिद्धपीठस्थो रामदेवः प्रणम्यते॥ 1॥
श्रीद्वारकाधीश-कलावतारं स्वधर्मरक्षाव्रतमादधानम्।
तेजोमयं क्षात्रकुलावतंसं श्रीरामसा देवमहं नमामि॥ 2॥
अनन्तवीर्यो भगवान् मुरारिर्गोविप्रसाधु-परिपालनाय।
रक्षोवधायैव कृतावतारः श्रीरामदेवो जयताज्जगत्याम्॥ 3॥
श्रीकृष्णद्वारकानाथ-भक्तस्याऽऽजमलस्य ह।
आविर्भूतो गृहे भक्त्या रामदेवः प्रणम्यते॥ 4॥
मैणादेः हृदयानन्दं बाललीला-सुखावहम्।
महामोद-प्रदातारं रामदेवं नतोऽस्म्यहम्॥ 5॥
सर्वांगसुन्दरं सौम्यं सुललाटं सुविश्रमम्।
दिव्यरूपधरं देवं वन्दे ''नेतलदे-पतिम्''॥ 6॥
अश्वारूढोऽतितेजस्वी प्रभामण्डलमण्डितः।
सेव्यते रामसा-देवो बाबा भक्तभयापहः॥ 7॥
''आदू'' राक्षस-हन्तारं सर्वलोकसुखावहम्।
भूतेप्रेतपिशाचघ्नं वन्देऽहं रामसाप्रभुम्॥ 8॥
बालीनाथ-प्रियं शिष्यं सर्वलोकैः सुपूजितम्।
धर्मरक्षाकरं देवं वन्देऽहं लोकदेवताम्॥ 9॥
ध्वजाभल्लधरं धीरमश्वारूढं नृपात्मजम्।
साक्षाद् वीररसं व्यक्तं रामदेवं नमाम्यहम्॥ 10॥
मायावी राक्षसोऽरण्ये भैरवो नरभक्षकः।
लीलयैव हतो येन तं वन्दे रामसा-प्रभुम्॥ 11॥
अन्तर्यामी च सर्वज्ञः स्मृतिगामी महाभुजः।
समर्थः शक्तिसम्पन्नः स्तुयते रामसा प्रभुः॥ 12॥
आधिव्याधिहरो देवः शरणागतवत्सलः।
स्तूयते श्रद्धया भक्त्या बाबा मे रामसा प्रभुः॥ 13॥
निरयं गोधृतदीपेन धूपेन गुग्गुलस्य च।
सेवितो रामसा प्रीतो भक्त्या श्रीकृष्णकीर्तनैः॥ 14॥
सत्संगैः कीर्तनैर्भक्त्या धर्मरक्षा-धृतवृतम्।
समताममतामूर्तिं वन्दे श्रीरामसाप्रभुम्॥ 15॥
दीनानां दलितानाञ्च पीडितानां भयापहम्।
दीनबन्धुं दयासिन्धुं रामदेवं नतोऽस्म्यहम्॥ 16॥
यत्रतत्र हरेश्चर्या कथा कीर्तन-तत्परः।
रामसा बोधयामास कीर्तनीयः सदा हरिः॥ 17॥
प्रसन्नवदनाम्भोजं तेजोवलयभूषितम्।
वीरभावाभिषिक्तं तं वन्दे श्रीरामसा प्रभुम्॥ 18॥
''रूणीचा'' रामदेवस्य सिद्धभूमिं सुपूजिताम्।
लक्खीमेला-स्थलं पुण्यं नमामि नतमस्तकः॥ 19॥
श्वेताबभूतीमसशीतपिन्ति कण्डूयनाद्याखिलचर्मरोगान्।
भक्त्या दयार्द्रो विधुनोति बाबा श्रीरामदेवः शरणागतानाम्॥20॥
प्रणम्य द्वारकानाथं यः पठेद् रामसा-स्तुतिम्।
कार्यसिद्धिर्भवेत्तस्य लभते जयमङ्गलम्॥ 21॥
''ॐ श्रीकृष्णार्पणमस्तु''

**( पूर्वप्राध्यापकः ), पो.-छापर ( चूरू )**
**Mob.: 9351226660**

# श्रीअजमल-भक्ति-गाथा ( काव्यम् )

( मङ्गलाचरणम् )

❑ आचार्य पं. नथमलशास्त्री दाधीचः

श्रीवासुदेवं पुरुषं पुराणं ब्रह्मण्यदेवं परमात्मतत्त्वम्।
अद्वैतमाद्यं तमचिन्त्यरूपं श्रीद्वारकेशं प्रणमामि भक्त्या।। 1।।
आर्यावर्तधरां पुण्यां धर्मप्राणां हरिप्रियाम्।
सर्वदेवमयीं पुण्यां वन्दे ! भारतमातरम्।। 2।।
अहिंसासत्यनिष्ठानां त्यागिनाञ्च तपस्विनाम्।
धीराणां धर्मशीलानां ऋषीणां ज्ञानिनां तथा।। 3।।
शस्त्रास्त्रशास्त्रविज्ञानां वीराणां विदुषां पराम्।
जननीं जन्मभूमिञ्च वन्दे ! भारतमातरम्।। 4।।
अथ-चन्द्रवंशी नृपो ''हस्ती'' स्थापयामास यत्पुरम्
राजधानी तदेवासीद् द्वापरे हस्तिनापुरम्।। 5।।
शन्तनोर्वंशजाश्चोनत्र सम्राजश्चक्रवर्तिनः।
युगान्ते शासनं चक्रुः प्राचीनं दुर्गमास्थिताः।।
कथावशेषा भुवि राजवंशा ये वर्णिता भागवते पुराणे।
युगान्तरे क्षात्रकुलावतंसा भूपा बभूवुर्भारतावनीशाः।। 6।।
जनधनबलसेव्यस्तोमरोऽनङ्गपालो,
भुजबलपरसैन्य-दर्पहा दानशीलः।
विजितसकलभूपस्तेजसा विक्रमेण,
निखिल भरतभूमिञ्चैकच्छत्रः शशास।। 7।।
क्षात्रधर्मरतो धीरोऽनङ्गपालः प्रजाप्रियः।
विजयी विक्रमी वीरो दिल्ली-सम्राट् सुविश्रुतः।। 8।।
रणसिंहो नरेना-स्थस्तत्कनिष्ठः सहोदरः।
श्रद्धया परया भक्त्या द्वारकानाथमाश्रितः।। 9।।
महान्तो मुनयः सिद्धा दैवज्ञा देवता विदुः।
कालगत्या पराभूता ''हीश्वरेच्छां बलीयसीम्''।। 10।।
ऐश्वर्यशौर्यसामर्थ्यभक्तिशक्तिसमन्वितः।
प्रबलोऽपि हि देशोऽयं कालगत्या विमर्दितः।। 11।।
अज्ञानाद्वैमनस्याच्च राज्ञामन्योऽन्यविग्रहात्।
दौर्भाग्याद् दुर्बलो देशः समाक्रान्तो विधर्मिभिः।। 12।।
क्रूरैर्दुरात्मभिर्दुष्टैः शासकैर्यावनैस्तदा।
हाहाकारो महानासीद् धर्मरक्षा कथं भवेत्।। 13।।
समसाख्य ऋषेः शिष्यौ गुरुभक्तौ च निर्भयौ।।
रणसी-खींवणौ वीरौ धर्मरक्षाधृतवृतौ।। 14।।
साधुवेशधरौ पूज्यौ भक्तौ भक्तिप्रचारकौ।
स्वधर्मरक्षकौ धीरौ हरि-कीर्तनतत्परौ।। 15।।
धीरतां वीरतां भक्तिं तयौः शक्तिञ्च विश्रुताम्।
विलोक्य ज्ञापितो दुष्टैः पिशुनैः शासकस्ततः।। 16।।
तयोर्भक्तेश्चमत्कारं द्रष्टुं यवनशासकः।
आरेण तिग्मधारेण तयोर्देहौ विदारितौ।। 17।।
स्वधर्मे निधनं श्रेयः सन्धार्य मानसे दृढम्।
ब्रह्मलीनौ समाधिस्थौ देहं त्यक्त्वा दिवं गतौ।। 18।।
वरदानाद् गुरोस्तत्र रक्तबिन्दुर्न देहभाक्।
दुग्धधारा ह्यविच्छिन्ना पुष्पाणि गन्धवन्ति च।। 19।।
तयोर्देहार्धभागौ तु ततश्चान्तर्हितौ गतौ।
भक्ति-सिद्धिं गुरोर्भक्तिं दृष्ट्वा भीतो विकम्पितः।। 20।।
प्रायश्चित्तपरो भूत्वा तद्वंश्यानां सुखेच्छया।
समाधि-स्थलनिर्माणं कारयामास सत्वरम्।। 21।।
''नरेना'' रणसिंहस्य ''विचूणे'' खींवणस्य च।
सिद्धभूमिः समाख्याता देहार्धपतनाद् द्वयोः।
तत्र सिद्धौ सुपूज्येते पुष्पैर्गोदुग्धधारया।। 22।।
भक्त-गाथा-प्रसंगेऽत्र बलिदानं तन्महद्भुतम्।
स्मरामि श्रद्धया भक्त्या नमामि नतमस्तकः।। 23।।
अत्याचारैः समाक्रान्तो नरेना यावनै स्तदा।
षट्सुताः रणसिंहस्य युद्धे वीरगतिं गताः।। 24।।
सप्तमोऽथ सुतो भक्तो धर्मनिष्ठो दृढव्रतः।
अजमलेति विख्यातस्तोमरान्वयशासकः।। 25।।
अजमलनरनाथः क्षात्रधर्मस्वभावः
तँवर कुलवरिष्ठो बाडमेरावनिस्थः।
मधुरवचनभाषी सेवको गोद्विजानां,
भजन-नियमभक्त्या द्वारकानाथ-भक्तः।। 26।।
जैसलमेर-नरेशेन वीरायाजमलाय च।
प्रदत्ता जयसिंहेन ''मैणादे'' स्वकुमारिका।। 27।।
विवाह-मण्डपे कन्या वस्त्राभूषणभूषिता।
राज्ञोपवेशिता पङ्गवी च्छलेन मन्दलोचना।। 28।।
पाणिग्रहणमात्रेण मैणादेऽभूत्सुलोचना।
वर-भक्त्याश्चमत्कृत्या जाता सर्वाङ्गशोभना।। 29।।
महात्मनो रणसिंहस्य गुरुभक्तेर्फलं परम्।
द्वारकानाथभक्तेर्हि प्रत्यक्षैषा चमत्कृतिः।। 30।।
भक्त्याश्चमत्कारमिदं विलोक्य नार्यो जगुर्मङ्गलगीतकानि।
अखण्डदाम्पत्यसुखाय वृद्धाः स्वाशीर्वचोभिर्युयुजुः प्रहृष्टाः।।31।।
दुर्गमेकञ्च भूक्षेत्रं दासदासीजनांस्तथा।
बहुलं पारिबर्हञ्च कन्यादाने ददौ नृपः।। 32।।
यशस्वी धर्मिको राजा ''मैणादे'' सहधर्मिणी।
ग्रामे स्वे चोण्डुकाश्मीरे राजेते राजदम्पती।। 33।।
सर्वसौभाग्यसम्पन्नो दानी मानी दयानिधिः।
परन्त्वपुत्रता दुःख सन्तप्तो भूपतिः सदा।। 34।।

( पूर्वप्राध्यापकः ), पो.-छापर ( चूरू )
Mob.: 9351226660

पुस्तकसमीक्षा

❑ म.म. देवर्षिकलानाथशास्त्री
प्रधानसम्पादकः

# ग़ज़लगीतिसंग्रहः

ग़ज़लगीतिविधा यथा उर्दूभाषाक्षेत्रे तत्सम्बद्धेषु च देशेषु लोकप्रिया तथा भारते हिन्दीभाषाक्षेत्रेऽपि सुतरां प्रसारिता गीतिविधाऽस्ति। इदमप्याश्चर्यकरं तथ्यं यत् उर्दूत इतरासु यासु भाषासु भारते ग़ज़ल गीतिनां प्रणयनं प्रारभ्यत तासु सर्वप्रथमं संस्कृतमासीत्, तदनु सिन्धीभाषा, अन्याश्च भाषा अभूवन्, हिन्दीभाषा तु तदनन्तरमायाता (दुष्यन्त-कुमारसूर्यभानुगुप्तप्रभृतीनां प्रणयनैः)। जयपुरीयेण कविशिरोमणिभट्टश्रीमथुरानाथशास्त्रिणा विंश्याः शताब्द्या आरम्भे ग़ज़लगीतीनां संग्रहः प्राकाशि। तदनन्तरं तु पं. बच्चूलालअवस्थिप्रभृतिभिः प्रणीता एव ग़ज़लगीतयः। अवस्थिवर्याणामनुयायिषु सुप्रथितः कविमूर्धन्यो राष्ट्रपतिसम्मानितः प्रो. अभिराजराजेन्द्रमिश्रो यथा विविधासु गद्य-पद्यविधासु विपुलं साहित्यं प्राणैषीत् तथा ग़ज़लगीतीरप्यनेकाः प्रणीतवान्।

कविवर्यस्य तस्य ग़ज़लगीतीनां संग्रहः ''औदुम्बरी'' शीर्षकेण प्रकाशमायातो यस्य परिचयः ''अभिनव-गलज्जलिका सङ्कलना'' नाम्ना मुद्रितोऽस्ति मुखपृष्ठे। अस्मिन् संग्रहे 69 संस्कृतग़ज़लगीतयः सङ्कलिताः सन्ति। अन्तिमाया गीतेः शीर्षकमस्ति ''औदुम्बरी'' ति तस्या एव शीर्षकमादाय ग्रन्थस्य शीर्षकं निर्धारितम्। औदुम्बरी खलु गूलर वृक्षस्य प्रशस्तौ रचिता गीतिः। उदुम्बरवृक्षो मधुरफलानां कृते प्रसिद्धः। एवं विभिन्नान् विषयानादाय, विविधा मनोभावनाः प्रकटयन्त्यो ग़ज़लगीतयोऽत्र द्रष्टुं शक्यन्ते।

का ग़ज़लगीतिः कस्यां तिथौ (दिनाङ्के) कस्मिन् स्थाने प्राणीयतेति सूचना, प्रतिगीतिं टिप्पणीरूपेणाऽन्ते मुद्रिताऽस्ति। प्रत्येकगीतेर्हिन्द्या गद्यानुवादोऽपि तत्समक्षं पृष्ठे मुद्रित इत्यनेन पाठकानां जिज्ञासूनाञ्च सुमहत् सौविध्यं भवेत्। गीतीनां विषयवस्तु हृदयावर्जकं भवेदेवेति सरलतयाऽनुमातुं शक्यते। मनोभावनास्तु सन्त्येवैतासु, एकस्यां विनोदमयी सैषा सूचनाऽप्यस्ति यत् के के सुप्रथिता जनाः कारागारे विलसन्ति (यथा आसारामः गोपाल कण्डा, तेजपाल, इत्यादयः) गीतिषु कविनाम यत् ''**तखल्लुस**'' इत्युर्दूभाषायां कथ्यते यच्च उर्दूग़ज़ल गीतिष्वन्तिमे चरणे कविभिरुल्लिख्यते तथा मिश्रवर्येण प्रतिगीति नोल्लिखितम्, कुत्रचन ''अङ्ग गीति-स्त्रिवेणीकवेः श्रूयताम्'' इत्यादिरूपेण त्रिवेणीकविनाम्ना कवेरुल्लेखोऽवश्यं द्रष्टुं शक्यते।

**ग़ज़लगीतिसंग्रहस्यास्य हार्दं स्वागतम्।**

**औदुम्बरीः कविः मिश्रोऽभिराजराजेन्द्रः, प्रका. वैजयन्त प्रकाशन 8 बाघम्बरी मार्ग, भरद्वाजपुर (अल्लापुर) इलाहाबाद उ.प्र. पृ.सं. 160, मू. 500/-.**

### संस्कृतपत्रकारताविमर्शको ग्रन्थः

संस्कृतपत्रकारताया इतिहासः 1966 ई. वर्षात् पण्डितपत्रिकायाः प्रारम्भतः प्रारभते इति तथ्यं सम्प्रति सुविदितम्। तदनु निरन्तरं वर्धते संस्कृतपत्रकारिता, तस्यां च वैदुष्यमया आलेखा अपि दृश्यन्ते, कथाकवितादयोऽपि, समाचारा अपि, समीक्षा अपि, हास्यव्यंग्यमयरचना अपि। वृत्तमिदं पठित्वा प्रमोदेरन् पाठका यत् सद्यः प्रकाशिते एकस्मिन् ग्रन्थे संस्कृत पत्रकारताया अपि परिचयः प्राप्यते, संस्कृते हास्यव्यंग्यलेखनस्येतिहासोऽपि। परिणामतः पत्रकारतायां हास्यव्यंग्यमयं लेखनं, पत्रकारैर्हास्यव्यंग्यप्रकाशनाय कृतमवदानमित्यादयो विषया अप्यवगम्येरन्नेव।

शोधमयेऽस्मिन् हिन्दीग्रन्थे (संस्कृत पत्रिकाएँ और हास्य व्यंग्य शीर्षकं बिभ्रति) सर्वे एते विषया विवेचिताः सन्ति। अध्यायसप्तकं दधानेऽस्मिन् ग्रन्थे प्रथमेऽध्यायद्वये संस्कृतपत्रकारताया विवरणमस्ति, तदनन्तरमध्यायद्वये हास्यव्यंग्यरचनानां परिचयः (संस्कृतसाहित्ये) प्रत्तोऽस्ति, ततोऽध्यायद्वये संस्कृतपत्रपत्रिकासु प्रकाशितस्य हास्यव्यंग्यसाहित्यस्य विवरणमस्ति, अन्तिमेऽध्याये च हास्यव्यंग्यरचनानां शोधात्मको विमर्शोऽस्ति।

शोधग्रन्थेषु साम्प्रतं प्राचीनसाहित्यस्याध्ययनं परिदृश्यते, अथवा नवीनसाहित्यस्य परिचयात्मकं विवरणं दृश्यते किन्तु प्रायशोऽस्पृष्टानां, नितरामल्पज्ञातानां च नूतनानां विषयाणां परिचायका ग्रन्था न प्रकाशमायान्ति। अस्मिन् विशाले ग्रन्थे तादृशा अल्पज्ञाता विषया विवृताः सन्तीति दृष्ट्वा सन्तुष्येयुः पाठका इति स्पष्टमेव।

ग्रन्थ-प्रणेता डॉ. तारेशकुमारशर्मा मूलतो राजस्थानीयः प्रबुद्धो लेखकोऽस्ति, सम्प्रति दिल्लीवासिनोऽस्यायं ग्रन्थो दिल्लीस्थेनैव प्रकाशकेन प्रकाशितोऽस्ति। अत्र हि शतशः संस्कृतपत्रिकाणामपि परिचयो दृश्येत सहस्रशो हास्यव्यंग्यरचनानामपि। अनेकासां हास्य व्यंग्य-काव्य-रचनानामुद्धरणान्यपि पाठकानामुपकारीणि भविष्यन्तीत्यपि सुस्पष्टम्।

**ग्रन्थस्यास्यावतरणोपलक्ष्ये वर्धाप्यते युवा लेखकः।**

**संस्कृत पत्रिकाएँ और हास्यव्यंग्यः ले. डॉ. तारेशकुमार शर्मा प्रकाश. शिवालिका प्रकाशन 27/16 शक्तिनगर, दिल्ली-7, पृ.सं. 500 मू. 595/-.**

### संस्कृतपत्रिकाया विशेषाङ्कः

राजस्थान (शाहपुरा, जयपुर) तः प्रकाश्यमानायां ''साहित्यमन्दाकिनी'' त्याख्यायां त्रैमासिकपत्रिकायां (सद्यः प्रकाशिते सांविधानिकप्रस्थितिविशेषाङ्के) भारतीयसंविधानेन संस्कृतभाषायै प्रत्तस्य सम्मानस्य बहवः सङ्केताः सूचिताः सन्ति। 351 अनुच्छेदः स्पष्टीकरोति संविधाने यद् राष्ट्रभाषाया अधिकृतशब्दावली प्रमुखतः संस्कृतभाषाऽऽधारिता भवेत्। संविधानं यदा देशेन स्वीकृतं तदा आङ्ग्लभाषया, हिन्दीभाषया च सह संस्कृतभाषायामपि तस्याऽधिकृतः पाठः प्रकाशितोऽभूत। 1950 ई. वर्षतः 14/1/1985 कालावधौ यानि संशोधनानि संविधानेऽक्रियन्त, तानि समाविश्य संविधानस्य संशोधितोऽधिकृतश्च पाठः 1985 ई. वर्षे पुनः प्राकाश्यत यदन्तर्गतं तदनुसूच्यादिषु शपथग्रहणस्य यानि प्रारूपाणि मुद्रितानि तान्येवादाय संसदि विधानसभादिषु च सांसदा, विधायकाश्च संस्कृते शपथं गृह्णन्ति। तदैव तस्य वैधता भवति। एवंविधाः सूचनाः, परिज्ञानं चाद्यत्वे संस्कृतजगत्यत्यावश्यकम्।

**संस्कृत-मन्दाकिनी (त्रैमा.) सम्पा. डॉ. शङ्करलालशास्त्री प्रका. राजस्थान ग्रामोत्थान एवं संस्कृत अनुसन्धान संस्थान शाहपुरा (जयपुर) वार्षिकशुल्कम् 100/-.**

---

**संस्कृत समाचारः**

# विश्वगुरुदीप आश्रमशोधसंस्थाने शोधपीठस्थापनम्

**❑ डॉ. सुरेन्द्रकुमारशर्मा**

जयपत्तनीये विश्वगुरुदीप आश्रमशोधसंस्थाने विगतमार्चमासे षण्णां शोधपीठानां स्थापना सञ्जातेति संस्थानस्याध्यक्षैः विश्वगुरु-स्वामी-महेश्वरानन्दपुरी-महाभागैः संसूचितम्। एषु शोधपीठेषु 'वेदपुराणस्मृति' शोधपीठे पण्डित अनन्तशर्माणः 'भाषामीमांसा एवं शास्त्र' शोधपीठे महामहोपाध्यायाः देवर्षि-कलानाथ-शास्त्रिणः, धर्मदर्शनसंस्कृति शोधपीठे महामहोपाध्यायः प्रो. दयानन्द-भार्गव-महोदयः, ज्योतिष-पौरोहित्य-कर्मकाण्डशोधपीठे डॉ. रामदेव-साहू-महाभागाः, आयुर्विज्ञानशोधपीठे डॉ. नारायण-शास्त्री-काङ्कर-महोदयाश्च, योग शोधपीठे स्वामी-ज्ञानेश्वरपुरी-महाभागाः पीठाचार्या नियुक्ताः। शोधपीठानां कार्यारम्भोऽपि सञ्जातः। संस्थानेन प्रति-रविवासरम् 'अन्तर्राष्ट्रिय वैदिक व्याख्यानमाला' समायोज्यते। अस्या व्याख्यानमालाया अन्तर्गतं वेदपुराणस्मृति शोधपीठे पण्डित अनन्त-शर्म-महोदयानां द्वादश व्याख्यानानि, भाषामीमांसा एवं शास्त्र शोधपीठे महामहोपाध्याय देवर्षि-कलानाथ-शास्त्रिवर्याणां व्याख्यानद्वयं, ज्योतिष-पौरोहित्य-कर्मकाण्ड शोधपीठे डॉ. रामदेव-साहू-महोदयानां त्रीणि व्याख्यानानि सम्पन्नानि। शोधपीठेषु विविधशास्त्रीयपाण्डुलिपीः अधिकृत्यापि शोधकार्याणि प्रवर्तमानानि सन्ति।

# अस्माकं गुरवः

( गताङ्कादग्रे )

❑ वेणीमाधव गो. धर्माधिकारी

## 1947 ई. वर्षीये भीषणसंकटेऽद्भुतं नेतृत्वम्।

अन्ते देशविभाजनार्थं कांग्रेसनेतृणां स्वीकृतिरभवत्। तदनुसारं च 3 जून 1947 दिने तस्य घोषणाप्यभवत्। तदा सहसा देशस्य परिस्थितेश्चित्रमेव परिवर्त्तितम्। स्वयंसेवकेभ्योऽयमादेशः प्रदत्तो यद् यो भूभागः पाकस्थानं भविष्यति तत्रत्यान् हिन्दून् यथाशीघ्रं सुरक्षितेन विधिना भारते प्रेषयेयुः। यावच्चान्तिमो हिन्दुस्ततो भारते नागच्छेत् तावद् दृढतापूर्वकं तत्रैव स्थिताः स्युः। तेषु भीषणदिवसेषु स्वयंसेवकेभ्यो नैकानी हृदयविदारकानि, रक्तरञ्जितानि दृश्यानि दृष्टिपथमायातानि। रणकुशलता, त्यागो बलिदानं चैतेषां कथाः भारतीयेतिवृत्ते स्वर्णाक्षरेषु लेखनीयाः।

तेषु दिवसेषु गुरुमहाभागानामप्युदाहरणं महत् स्फूर्तिप्रदमासीत्। यतः श्रीगुरुमहाभागा अपि तेष्वातङ्कपूरितेषु प्रदेशेषु प्रवासं कुर्वन्त आसन्। 1947 ई. अगस्तमासे प्रथमसप्ताहे सिन्धुप्रदेशस्य भ्रमणं विधाय यदा तैः पाञ्चालप्रदेशे प्रवेशः कृतस्तदा समस्तः पञ्चनदप्रदेशः आतङ्कपूरितो भयग्रस्तश्चासीत्। अथापि स्थाने स्थाने आपद्ग्रस्तानां हिन्दुबान्धवानां साक्षात्कारं विधाय तेषां मनोबलवर्द्धनोत्कण्ठया गुरवः स्वप्राणान् संकटे पातयित्वाऽपि विभिन्नेषु स्थानेषु संप्राप्ताः। अमृतसरस्तोऽम्बालापर्य्यन्तं ते समस्तेषु क्षेत्रेषु गताः। बहुवारं प्रवासे वर्षया ध्वस्तेषु मार्गेषु मालवाहकबाष्पयानकक्षेषु चालक-समीपे वा उपविश्याग्रे गताः।

मार्गे च हेडूनामकस्थाने नद्याः पारे गन्तुं वाष्पयानस्य सेतुरासीत्। तत्र सम्प्राप्ते एतादृशं दृश्यमुपस्थितं यदग्रेगमनमसम्भवमेव यतो लोहपट्टिका दोलायमानाऽऽसीत्, अधश्च नद्याः प्रबलः प्रवाहः परं गुरुमहाभागाः पट्टिकोपरि पादक्षेपं कृत्वा तीव्रगत्या पारे गताः। अन्ये स्वयंसेवकबान्धवा अपि साहसं कृत्वा तदनुसरणं विधाय पारेगताः। लुधियानानगरे निश्चिते स्थले समय एव सम्प्राप्ताः। तत्रत्याः सर्वे आश्चर्यान्विता अभवन्।

देशविभाजनस्यातीव भयावहपरिस्थितौ स्वयंसेवकैः एकमन्यदपि अतीव कठिनं कार्यं करणीयमभवत्। पाकस्थानादागतानां बन्धुभगिनीनां तत्कालं निवासभोजनयोर्व्यवस्थापि करणीया अभवत्। संघस्य तेषु दिवसेषु सेवाकार्ये अतीव कष्टस्य, सहिष्णुतायाः, सहानुभूतेः, संवेदनशीलतायाश्च महद्दर्शनं भवतिस्म। गुरुमहाभागैः देशविभाजनमन्तिमं सत्यं न स्वीकृतम्। मातृभूमेः

खण्डितप्रतिमायाः पुनरखण्डं निर्माणं विधातुं प्रत्येकस्य देशभक्तस्य हृदये भावः पल्लवितः स्यादिति तेषां तीव्रा आकाङ्क्षाऽऽसीत्।

## सामञ्जस्यार्थे आव्हानम्

श्रीगुरुमहाभागानां सम्पूर्णेऽपि देशे भ्रमणेन भाषणैश्च संघस्य लोकप्रियता प्रतिदिनं द्विगुणिततया चतुर्गुणिततया च गत्या वर्द्धमानाऽऽसीत्। कतिपय-मासेष्वेव संघस्य सम्मुखे एका कठिनतमा परीक्षा समुपस्थिताऽभूत्। देशविभाजनार्थं स्वीकृतिप्रदातृन् नायकान् प्रति स्वयंसेवकेषु जनतायाञ्चातीव क्षोभः स्थितोऽभूत्, तं शमयद्भिर्गुरुमहाभागैराव्हानं कृतं यदपरप्रणालीं स्वीकुर्वाणो जनाः कीदृशा अपि भवन्तु नाम अस्माकं समाजस्यैव सन्ति। तैरपि देशस्य समाजस्य च कृते किञ्चित् श्रेष्ठं कार्यं कृतम्, त्यागोऽपि कृतः। अत एव तान् प्रत्यपि अस्माकं स्नेहपूर्णा बन्धुत्वभावना भाव्या। श्री गुरुमहाभागा-नाममृतमयमजातशत्रुत्वभावपूर्णमाव्हानं तदनुसार-माचरणञ्च सम्पूर्णेन संगठनेन स्वयंसेवकैश्च स्वीकृतम्। 14-1-1948 दिने मुम्बई नगरे लक्षावधिभ्यः स्वयंसेवकेभ्यो विशालसभायां संदेशममुमेव तेऽश्रावयन्। संघस्य वर्द्धमानामिमां जनप्रियतामवलोक्य कांग्रेसनायकेभ्यो भयमभवत् यदग्रे भविष्ये राजनैतिकक्षेत्रेऽपि एते बाधका भवितुं शक्नुवन्ति। अतएव तैः संघप्रतिबन्धननीतिः स्वीकृता। महाराष्ट्रे एकलक्षस्वयंसेवकानां शिविरं सर्वकारेण प्रतिबद्धम्। तत्पूर्वं 1947 ई. अक्टूबर मासे केन्द्रसर्वकारस्य गुप्ताधिवेशने निर्णीतं यत्कस्या-प्यवसरस्यौचित्यं मत्वा संघस्योपरि प्रतिबन्धो नियोज्यः।

**ब्रह्मपुरी, जयपुरम्**

---

**प्रेरकप्रसङ्गशतकम्** **षट्सप्ततितमः प्रसङ्गः**

# एवमपि भवति

❑ **श्रीमती आराधना धर्माधिकारी**

एका नवोढा बालिका श्वशुरालये नवीनैवासीत्। तस्याः श्वश्रूः स्वं पतिं शर्माजीति सम्बोधयति स्म। अथैकस्मिन् दिने बालिकायाः पतिः कार्यालयात् शीघ्रमागतः। पत्नीं चावदत्-स्वहस्ताभ्यां निर्मितं चायपेयं पायय। सा पाकगृहे गता। तत्र तस्याः श्वश्रूः पत्युः भगिनी चास्ताम्। बालिका अवदत् शर्माजी समागताः तेषां कृते चायपेयं कर्त्तुमिच्छामि। तस्याः श्वश्रूः अवदत्-ते तु मध्ये आगच्छन्त्येव न। प्रातः गच्छन्ति सायं चागच्छन्ति। आपणं त्यक्त्वा कथमागच्छेयुः। बालिका अवदत्-भवतां न, मम शर्माजी समागताः। श्रुत्वैवोभे अहसताम्, अवदतां च त्वं पूर्वं चायपेयनिर्माणं कुरु पश्चादावां पाकं करिष्याव इति।

**218, धर्माधिकारिभवनं, ब्रह्मपुरी, जयपुरम्**

बालोपयोगिनी लघुकथा

# भारतभूम्याः विभूतयः

❑ अविनाश शर्मा

## नृगनृपतिकथा

एकदा यदुकुमारकाः साम्बप्रद्युम्नचारुभानु-गदादयः विहर्तुम् एकस्मिनुपवने जग्मुः। सुचिरं क्रीडित्वा ते सर्वे पिपासिताः जलं विचिन्वन्तः एकस्मिन् निरुदके कूपे एकं गिरिसदृशमद्भुतं कृकलासं वीक्ष्य विस्मितमानसाः तस्योद्धरणे बहून् यत्नान् चक्रुः किन्तु तं समुद्धर्तुं नाशक्नुवन्। समुत्सुकाः ते सर्वे श्रीकृष्णस्य समीपमागत्य तस्य च कृकलासस्य विषये कथयामासुः। श्रीकृष्णः तत्रागत्य तं कृकलासं वीक्ष्य वामेन करेण अनायासमेव तमुज्जहार। सोऽपि जीवः श्रीकृष्णस्य करस्पर्शेन निजकृकलासरूपं तत्क्षणमेव विहाय सन्तप्तहेमवत् चारुमनुजो बभूव। तस्य कृकलासस्य नरदेहधारणस्य कारणं जानन्नपि श्रीकृष्णः सर्वान् युदुकुमारान् विज्ञापयितुं तं नरं पप्रच्छ। हे महाभाग नरोत्तम त्वं कोऽसि? कतमेन कर्मणा इमां कृकलासयोनिं सम्प्राप्तः, यदि त्वं वक्तुमुचितं मन्यसे तर्हि त्वद्वृत्तान्तं वद।

श्रीकृष्णं प्रणिपत्य तेनाऽपि स्ववृत्तान्तं निम्नप्रकारेणेक्तम्। ''हे प्रभो! अहं इक्ष्वाकुतनयो नृगनामको नरेन्द्रोऽस्मि। दानिजनेषु सुविख्यातेन मया पयस्विन्यः शीलरूपगुणोत्पन्नाः सवत्सा असंख्याः गावः गुणशीलबद्धेभ्यः द्विजपुङ्गवेभ्यः प्रदत्ता आसन्।''

एकदा कस्यचिद्द्विजमुख्यस्य भ्रष्टा गौर्मम गोधने सम्प्राप्ता। अविज्ञाता च मया सा गौः एकद्विजाय प्रदत्ता। तां नीयमानां गां विलोक्य तत्स्वामी ''ममेति'' तमुवाच। तेनाऽपि ब्राह्मणेनोक्तम् यत् 'इयं गौः मम, नृगो मह्यं इमां दत्तवानिति।' विवदमानौ तौ विप्रौ माम् प्राप्य ऊचतुः यद्भवान् ''दातास्त्यथवाऽपहर्तास्ति'' तं विवादं श्रुत्वा मे भ्रमोऽभवत्। उभौ विप्रौ ममानुनयं तिरस्कृत्य तस्या धेनोः स्थाने उत्तमानां गवां लक्षमपि न स्वीचक्रतुः। नान्यद्गावमिच्छामीत्युक्त्वा उभौ विप्रौ जग्मतुः।

कालान्तरे आयुष्यक्षीणे सति यम- दूतैः यमसमीपमानीतो तत्राऽहं यमेन पृष्टः, 'हे नृग ! पूर्वं त्वमशुभं कर्मफलं भुङ्क्षे अथवा शुभं कर्मफलम्' मयाऽपि पूर्वमशुभं प्रोक्तम्। अत एवेदं कृकलास-जीवनम् प्राप्तम्। कृकलासशरीरेऽपि भगवद्दर्श-नार्थिनः मे पूर्वजन्मस्मृतिर्नाद्यापि विध्वस्ता जाता। अद्य अहं तव करस्पर्शेन नरदेहं पुनः प्राप्य तव दर्शनेन च विगतापराधोऽस्मि। श्रीमुकुन्दस्य स्तुतिं सम्पाद्य विमानमारुह्य सः नृगनृपतिः वैकुण्ठं ययौ। अनेन सिद्ध्यति यत् स्वजीवने एकमपि केवलं कृतमपराधं विना दण्डेन न शाम्यति। अतः अस्माभिः सर्वदा सावधानतया निरपराधं स्वजीवनं यापनीयमिति।

## नृगराजा की कथा

एक बार यदुवंश के कुमार साम्ब, प्रद्यूमु, चारुभानु गद इत्यादि एक उपवन में विहार (सैर) करने को गए। बहुत समय तक खेलकर वे सब प्यास लगने के कारण जल ढूँढ़ते हुए एक सूखे कुए के पास गये वहाँ एक पर्वतसदृश बड़े अद्भुत गिरगिट को देखकर आश्चर्यचकित उसे कुए के बाहर निकालने के बहुत से यत्न किए किन्तु उसे निकालने में सफल नहीं हुए। इस

गिरगिट को निकालने के इच्छुक वे सभी श्रीकृष्ण के समीप आए और उस गिरगिट के विषय में बताया। श्रीकृष्ण ने वहां आकर उस गिरगिट को देखकर बांए हाथ से अना यास ही उसको बाहर निकाल दिया। वह प्राणी भी श्रीकृष्ण के हाथ के स्पर्श से अपना गिरगिट का रूप उसी समय छोड़कर तपे सोने की तरह सुन्दर वर्ण का मनुष्य हो गया। उस गिरगिट के नरदेह धारण का कारण जानते हुए भी श्रीकृष्ण ने सारे यदुकुमारों को जानकारी देने को उस व्यक्ति को पूछा। हे महाभाग ! नरश्रेष्ठ ! तुम कौन हो ? किस कारण से इस गिरगिट की योनि को प्राप्त हुए, अगर तुम यह बताना उचित समझते हो तो बताओ।

श्रीकृष्ण को प्रणाम करके उसने भी अपना वृत्तान्त निम्न प्रकार से बताया। ''हे प्रभो ! मैं इक्ष्वाकु का पुत्र नृग नाम का राजा हूँ। दानियों में सुविख्यात मैंने दूधवाली शील रूप आदि गुणों से युक्त बछड़ेवाली असंख्य गायें गुणवान् और शीलवान् श्रेष्ठ ब्राह्मणों को दी थी।''

एकबार किसी श्रेष्ठ ब्राह्मण की भटकी हुई गाय मेरे गोधन में आकर मिल गई। यह न जानते हुए मैंने उस गौ को एक ब्राह्मण को दे दी। उस लायी हुई गाय को देखकर उसका स्वामी ''मेरी है'' यह उसे बोला। उस ब्राह्मण ने भी कहा कि ''यह गाय मेरी है नृग ने मुझे दी है'' विवाद करते हुए दोनों ब्राह्मण मेरे पास आकर बोले कि आप दान देने वाले हैं अथवा अपहरण करने वाले है। उस विवाद को सुन कर मुझे भ्रम हो गया। दोनों ब्राह्मणों ने मेरे अनुनय को तिरस्कृत करके उस गाय के स्थान पर उत्तम लाख गायें भी लेना स्वीकार नहीं किया। ''दूसरी गाय नहीं लेना है'' यह कह कर दोनों ब्राह्मण चले गए।

समय बीतने के पश्चात् आयु क्षीण होने पर यमदूतों द्वारा यमराज के समीप लाने पर वहाँ यम ने मुझे पूछा, ''हे नृग ! पहले तुम अशुभ कर्मफल भोगोगे अथवा शुभ कर्मफल?'' मैंने भी पहले अशुभ भोगूँगा यह कहा। इसीलिये गिरगिट का जीवन प्राप्त किया। गिरगिट के शरीर में भी भगवान् के दर्शन करने की प्रबल आकाँक्षा होने के कारण मेरी पूर्वजन्म की स्मृति आज भी विनष्ट नहीं हुई। आज मैं आपके करस्पर्श से नर देह को पुनः प्राप्त करके आपके दर्शन से अपराध रहित हो गया हूँ। श्री मुकुन्द की स्तुति करके विमान पर बैठकर वह नृगनृपति बैकुण्ठ को चले गए। इससे सिद्ध होता है कि अपने जीवन में केवल एक भी किया गया अपराध बिना दण्ड के शान्त नहीं होता। अतः हम लोगों को सदा सावधान होकर अपना जीवन निरपराध (रखकर) व्यतीत करना चाहिये।

**किशनपोल बाजारः, जयपुरम्**

---

**संस्कृत समाचारः**



# प्रोफेसर गौडमहाशयानां कृते लाइफ टाइम अवार्ड ( आजीवन-पुरस्कारः ) जोधपुरम्

महागुजरात-मेडिकलसोसायटी-जे एस आयुर्वेद-महाविद्यालय-नडियादइत्यनयोः संस्थयोः पक्षतः प्रदीयमानस्य वैद्य सुन्दर लाल जोशी स्मृति-लाइफ टाइम अवार्ड (आजीवन पुरस्कारस्य) कृते राजस्थान आयुर्वेद विश्वविद्यालयस्य कुपतिचराणां प्रोफेसर बनवारीलाल गौड महाशयानां चयनं कृतमस्ति।

प्रोफेसर गौड महोदयैः एकत्रिंशत् (31) पुस्तकानि लिखितानि, सहैव प्रायः पञ्चशतम् 500 शोधआलेखा अपि प्रकाशितास्सस्ति।

नारी-स्तम्भः

# नातश्चतुर्थं प्रसवमापत्स्वपि वदन्त्युत

❑ डॉ. राजेश्वरी भट्ट

वर्तमाने समये अस्माकं राष्ट्रं जनसंख्यावृद्धि-पर्यावरण-प्रदूषण-अशिक्षा-नार्युत्पीड़नादिभ्यो याभ्यो विस्फोटकरीभ्यः समस्याभ्यो ग्रस्तं, त्रस्तं अस्तं व्यस्तञ्च दृश्यते ताभ्यो विभीषिकाभ्यो लोकं त्रातुं सावहितञ्च कर्त्तुं शास्त्राणि क्रान्तदर्शिनो ऋषयश्च जागरूकाः प्रयत्नवन्तश्च दृश्यन्ते। अस्मिन् सन्दर्भे महाभारतग्रन्थरत्ने बहुसन्तानोत्पत्तिविरोधे स्वरमुत्थापयन्त्या दूरदर्शिन्याः पाण्डुपत्न्या देव्याः कुन्त्याः वचनान्यत्र विमर्शणीयानि प्रेरणामयानि च सन्ति। जानन्त्येव भवन्तः यत् महर्षेः दुर्वाससो वरदानेन दिव्यस्वरूपा पाण्डुपत्नी कुन्ती सन्तानाभावेनातुरेण सहचरेण पाण्डुना कृतेनानुरोधेन च धर्मराज-वायु-इन्द्रादीनां त्रिदेवानामाह्वानं कृत्वा ह्येषां प्रसादेन युधिष्ठिर भीम-अर्जुन इति त्रिपुत्रान् प्राप्तवती। तेजस्विनः त्रीन् पुत्रान् प्राप्यापि नृपः सर्वथा अपूर्णकाम इव आत्मानममन्यत। ततः पुत्र लोभाविष्टः पाण्डुः पुनः देवस्य कस्याप्यन्यस्य आह्वानं कृत्वा चतुर्थसन्ततेः प्राप्त्यर्थं राज्ञीं कुन्तीं किञ्चिद् ब्रवीतुं समुत्सुकोऽभवत् किन्तु किञ्चिदपि कथनात्पूर्वं मनोज्ञा कुन्ती स्वामिनः पाण्डोः अभीष्टं ज्ञात्वा तं वारयन्ती अब्रतीत्-

तथाहि-पाण्डुस्तु पुनरेवैनां पुत्र लोभान्महायशाः।
वक्तुमैच्छद् धर्मपत्नीं कुन्ती त्वेनमथाब्रवीत्।।

महा। आदि। सम्भव/122/76

सीमितपरिवारमेव सुखस्य मूलं स्वीकुर्वती गृहलक्ष्मी कुन्ती पाण्डोरभिलाषं उचितं नाऽमन्यत। शास्त्रवचनानि समर्थयन्त्याः परिवारकल्याण-कामिन्याः कुन्त्या दृष्ट्या चतुर्थसन्ततेरभिलाषिणी स्त्री स्वैरिणी भवति तथा पञ्चसन्ततीनां माता कुलटा कथ्यते। शास्त्रैरापत्स्वपि चतुर्थं प्रसवं वाच्यं कथयन्ति सुधियः।

तथाहि - नातश्चतुर्थं प्रसवमापत्स्वपि वदन्त्युत।
अतः परं स्वैरिणी स्यात् बन्धकी पञ्चमे भवेत्।।

महा। आदि। सम्भव/122/77

तथापि चतुर्थ पुत्रस्य प्राप्त्यर्थं पत्नीं कुन्तीं वारं वारं प्रेरयन्तं, शास्त्रसम्मतानि वचनान्यति क्रामन्तं पति पाण्डुं स्वाभीष्टाद् वारयन्ती विदुषी कुन्ती कथयति-

तथाहि - स त्वं विद्वन् धर्ममिममधिगम्य कथंनु माम्।
अपत्यार्थं समुत्क्रम्य प्रमादादिव भाषसे।।

महा। आदि। सम्भव/122/78

लोकव्यवहारनिष्णातायाः परिवारसाधिकाया गृह क्ष्म्याः शास्त्रसम्मतानि वचनानि दुराग्रहिणः आतुरस्य पाण्डोः कृते शंकराणि जातानि। सन्तुष्टः पाण्डुः पत्न्या वचनेन सम्मतोऽभवत् अकथयच्च-

एवमेतत् धर्मशास्त्रं यथा वदसि तत् तथा। दृश्यते यत् सम्प्रति शास्त्रवचनानामुपेक्षया संस्कृतेराचार-संहिताया उल्लंघनेन जनाः स्वेच्छाचारिणोऽभवन्। प्रतिक्षणं वर्द्धमाना जनसंख्या राष्ट्रकृते विस्फोटकरी जाता। उत्तरोत्तरं वृद्धिं प्राप्तानां मानवानां कृते,

**आवास-भोजन-शिक्षा-आजीविकादीनां साधनानां व्यवस्था न केवलं परिवारस्य कृते अपितु सर्वकारस्य कृतेऽपि दुःसाध्या वर्तते। राष्ट्रस्य सुसम्पन्नतायै आर्थिकस्थितिजनसंख्ययोर्मध्ये सन्तुलनमनिवार्यमस्ति। अनियन्त्रितगत्या वर्द्धमाना जनसंख्या राष्ट्रस्य कृतेऽहितावहा।**

## हिन्दी अनुवाद

वर्तमान समय में हमारा राष्ट्र जनसंख्या वृद्धि-पर्यावरण प्रदूषण-अशिक्षा-नारी उत्पीड़न आदि जिन विस्फोटकारी समस्याओं से ग्रस्त-त्रस्त एवं अस्तव्यस्त है उन समस्याओं से लोक को बचाने के लिए एवं सावधान करने के लिए शास्त्र तथा त्रिकालज्ञ ऋषि युग युग से जागरूक एवं प्रयत्नशील हैं। इस सन्दर्भ में महाभारत ग्रन्थ रत्न में अधिक सन्तानोत्पत्ति के विरोध में आवाज उठाने वाली दूरदर्शिनी पाण्डुमहाराज की पत्नी दूरदर्शिनी देवी कुन्ती के वचन विचारणीय हैं। स्पष्ट है कि महर्षि दुर्वासा के वरदान से दिव्यस्वरूपा पाण्डुपत्नी कुन्ती ने, सन्तान के अभाव से व्याकुल अपने पति पाण्डु के अनुरोध से धर्मराज, वायु तथा इन्द्रादि तीन देवताओं का आह्वान किया एवं उनकी कृपा से युधिष्ठिर, भीम, एवं अर्जुन, इन तीन पुत्रों को प्राप्त किया। तीन तेजस्वी पुत्रों को प्राप्त करने पर भी पाण्डु की इस विषय में इच्छा अपूर्ण ही रही। अतः लोभ से ग्रस्त पाण्डु ने अन्य किसी देव का आह्वान कर चतुर्थ सन्तान प्राप्ति के लिए कुन्ती को प्रेरित करने का विचार किया किन्तु पाण्डु के कुछ कहने से पूर्व ही पति पाण्डु के अभीष्ट को जानकर उनको रोकती हुई कुन्ती ने पति पाण्डु की अभिलाषा को उचित नहीं समझा। सीमित परिवार को ही सुख का मूल मानने वाली तथा शास्त्र वचनों का समर्थन करने वाली कल्याण-कामिनी कुन्ती की दृष्टि में चतुर्थ सन्तान की अभिलाषा करने वाली स्त्री 'स्वैरिणी' तथा पाँचवी सन्तान की माता 'कुलटा' कही जाती है आपत्तिकाल में भी पाँचवी सन्तान निन्दनीय मानी गई है। पत्नी कुन्ती के द्वारा बार-बार समझाए जाने पर भी शास्त्र सम्मत वचनों की उपेक्षा करने वाले पति पाण्डु को अपने धर्म का स्मरण दिलाती हुई कुन्ती पुनः चतुर्थ पुत्र की प्राप्ति रूप मनोरथ से रोकती हुई कहती है :-हे विद्वन् ! आप धर्म को जानते हुए भी प्रमाद के कारण धर्म का लोप कर मुझे सन्तानोत्पत्ति के लिए क्यों प्रेरित कर रहे हैं ? लोक व्यवहार में निपुण एवं परिवार साधिका गृहलक्ष्मी कुन्ती के शास्त्र सम्मत वचन दुराग्रह के आतुर पति पाण्डु के लिए सन्तोषजनक सिद्ध हुए। पाण्डु ने धर्मशास्त्र सम्मत वचनों पर तथा पत्नी के विचारों से सहमति प्रस्तुत की। किन्तु वर्तमान समय में शास्त्र वचनों की उपेक्षा एवं संस्कृति आचार संहिता के उल्लंघन से मानव स्वेच्छाचारी हो रहे हैं। प्रतिक्षण बढ़ती हुई जनसंख्या राष्ट्र के लिए विस्फोटकरी प्रतीत हो रही है। निरन्तर बढ़ती हुई जनसंख्या के कारण मानवों के लिए आवास, भोजन, शिक्षा, आजीविका आदि साधनों की व्यवस्था न केवल परिवार के लिए अपितु सरकार के लिए भी दुःसाध्य हो गई है। किसी भी राष्ट्र के सुविकास के लिए उस की आर्थिक स्थिति एवं जनसख्ंया के बीच पूर्ण सन्तुलन आवश्यक है निर्बाध गति से बढ़ती हुई जनसंख्या राष्ट्र हित में बाधक है।

**-सी-276, भाभा मार्ग, तिलकनगर, जयपुर**

आयुर्वेद-स्तम्भः

# वियोगकारकः योगः

❑ प्रो. बनवारीलालगौडः
पूर्व-कुलपतिः

**प्रतिवर्षमेव जूनमासस्यैकविंशतितमे दिनाङ्के योगदिवसः समापतति। न केवलं सम्पूर्ण भारतवर्षे दिवसस्यास्य स्वागतं योगप्रदर्शनमाध्यमेन देशवासिनः कुर्वन्त्यपितु विश्वस्यानेके देशाः स्वागतं कुर्वन्त्यस्य। दिवसेऽस्मिन् जनाः सार्वजनिकरूपेण योगासनानां प्रदर्शनं कुर्वन्ति। भारतसर्वकारेण राज्यानां सर्वकारैश्चायं योगदिवसः सुष्ठु प्रस्तुतूयते। यद्यप्यष्टाङ्गस्वरूपात्मकस्य योगस्यैव महत्त्वं वर्तते शास्त्रेषु, तथापि केवलं योगासनानां प्राणायाम-प्रकाराणां च प्रदर्शनेनैवास्य स्वागतं कृत्वा जनाः पूर्तिं कुर्वन्ति योगदिवसमहोत्सवस्य। भारतवर्षे प्राचीनकालत एव योगस्य महत्त्वं वर्तते। योगस्य प्रभावस्तु पाञ्चभौतिके शरीरे भवति, यत्र हि चतुर्विंशतितत्त्वानां विशिष्टया प्रक्रियया सर्वसंयोगो भवति।**

प्रतिवर्ष जून मास की दिनाङ्क इक्कीस को योगदिवस आता है। न केवल सम्पूर्ण भारतवर्ष में योगप्रदर्शन के माध्यम से देशवासी इस दिवस का स्वागत करते हैं अपितु विश्व के अनेक देश इसका स्वागत करते हैं। इस दिन लोग सार्वजनिक रूप से योगासनों का प्रदर्शन करते हैं। भारतसरकार द्वारा और राज्यों की सरकारों द्वारा यह व्यवस्थित रूप से प्रस्तुत किया जाता है। यद्यपि शास्त्रों में अष्टाङ्गस्वरूपात्मक योग का ही महत्व है। फिर भी केवल योगासनों और प्राणायाम के प्रकारों के प्रदर्शन से ही इसका स्वागत करके लोग योग दिवस के महोत्सव की पूर्ति करते हैं। भारत वर्ष में प्राचीनकाल से ही योग का महत्त्व है। योग का प्रभाव तो पाञ्च भौतिक शरीर पर ही होता है, जहाँ पर कि चतुर्विंशति तत्त्वों का विशिष्ट प्रक्रिया से सर्वसंयोग होता है।

**शरीरेन्द्रियसत्त्वात्मसहितस्य चतुर्विंशतितत्त्वात्मकस्यास्य संयोगस्य स्थूलस्वरूपेण प्रस्तुतीकरणं पाञ्चभौतिकेन शरीरेणैव भवति। शरीरमिदं चतुर्विंशतितत्त्वात्मकं भवतीति कथयन्त्यायुर्वेदज्ञाः दार्शनिकाश्च। पुरुषसंज्ञितेऽस्मिन् समूहे मनोदशेन्द्रियाण्यर्थाः प्रकृतिश्चाष्टधातुकी भवतीति कथयन्त्याचार्यश्चरकः। अत्र अष्टधातुकीति खादिपञ्चकबुद्ध्यक्ताहङ्काररूपा भवति। यथाहि-**

**खादीनि बुद्धिरव्यक्तमहङ्कारस्तथाऽष्टमः।**
**भूतप्रकृतिरुद्दिष्टा विकाराश्चैव षोडश।।**
**बुद्धीन्द्रियाणि पञ्चैव पञ्च कर्मेन्द्रियाणि च।**
**समनस्काश्च पञ्चार्था विकारा इति सञ्ज्ञिताः।।**

**( च.शा. 1/63-64 )**

शरीर-इन्द्रिय-मन एवं आत्मसहित इस चतुर्विंशतितत्त्वात्मक संयोग का प्रस्तुतीकरण पाञ्चभौतिक शरीर से ही होता है। यह शरीर चतुर्विंशतितत्त्वात्मक होता है, ऐसा आयुर्वेदज और दार्शनिक कहते हैं। पुरुषसंज्ञित इस समूह में मन, दश इन्द्रियाँ, इन्द्रियों के विषय और अष्टधातु की प्रकृति होती है, ऐसा आचार्य चरक कहते हैं। यहाँ अष्टधातु की प्रकृति आकाश आदि पाँच तन्मात्राएं, बुद्धि, अव्यक्त और अहङ्काररूप होती है। जैसे -

आकाश आदि (शब्द आदि सूक्ष्म पञ्च महाभूत अर्थात् तन्मात्रायें), बुद्धि (महत्तत्त्व), अव्यक्त (मूलप्रकृति) तथा आठवाँ अहंकार यह भूतप्रकृति कही गयी है और सोलह विकार हैं अर्थात् पाँच बुद्धीन्द्रियाँ (श्रोत्र, स्पर्शन आदि ज्ञानेन्द्रियाँ), पाँच कर्मेन्द्रियाँ (हस्त, पाद, गुदा, मेढ्र, वाक्) मनसहित पाँच विषय (शब्द, स्पर्श, रूप, रस, गन्ध) ये विकार इस संज्ञा वाले हैं अर्थात् इन्हें ही विकार कहा गया है।

**अत्र खादीनि सूक्ष्मभूतखादीनि तन्मात्रशब्दाभिधेयानि भवन्ति। बुद्धिस्तु महच्छब्दाभिधेया। अव्यक्तं मूलप्रकृतिरिति। अहङ्कारस्तु बुद्धिविकारः। एवं चैषा ''अष्टधातुकी'' प्रकृतिरिति कथिता। एषैव भूतप्रकृतिरित्यपि कथ्यते। षोडशविकारेषु तु पञ्चबुद्धीन्दियाणि पञ्चकर्मेन्दियाणि तथा आकाशादीनां स्थूलानां पञ्चमहाभूतानां ये शब्दस्पर्शरूपरसगन्धात्मकाः पञ्चार्थाः सन्ति ते ''अर्थाः'' इति संज्ञया गृहीताः। समनस्काश्चैते विकाराः षोडशसंख्यकाः भवन्ति। इत्थं चतुर्विंशतितत्त्वात्मकोऽयं पुरुषः धातुभेदेन चतुर्विंशतितत्त्वात्मकः स्मृतः।**

यहाँ आकाश आदि सूक्ष्मभूत तन्मात्रशब्द से कहे गये हैं वे होते हैं। बुद्धि तो महत् शब्द से कही गई है। अव्यक्त मूलप्रकृति है। अहङ्कार तो बुद्धिविकार है। इस प्रकार यह ''अष्टधातुकी'' प्रकृति कही गई है। इसे ही ''भूतप्रकृति'' यह भी कहा जाता है। षोडशविकारों में तो पाँच बुद्धिन्द्रियाँ और पाँच कर्मेन्द्रियाँ तथा आकाशदि स्थल पञ्चमहाभूतों के जो शब्द-स्पर्श-रूप-रस-गन्ध पाँच विषय हैं वे ''अर्थ'' इस संज्ञा से गृहीत हैं। मन के सहित ये विकार सोलह संख्यात्मक होते हैं। इस प्रकार चतुर्विंशतितत्त्वात्मक यह पुरुष धातुभेद से चतुर्विंशतितत्त्वात्मक कहा गया है।

**साङ्ख्यास्तु पुरुषोऽयं पञ्चविंशतितत्त्वमयो भवतीति कथयन्ति। यदाह-**

**मूलप्रकृतिरविकृतिर्महदाद्याः सप्त।**
**षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः।।**
**( सांख्यकारिका 3 )**

साङ्ख्य लोग तो यह पुरुष पञ्चविंशतितत्त्वमय होता है ऐसा कहते हैं। जैसा कि कहा गया है - मूलप्रकृति और महद् आदि सात अविकृति है और विकार सोलह का समूह है, पुरुष, यह न प्रकृति है न विकृति है।

**आचार्यः सुश्रुतस्तु सांख्यानामनुकरणं कृत्वा पञ्चविंशतितत्त्वात्मक एव पुरुषो भवतीति स्वीकरोति। यथा-**

**अव्यक्तं महान्, अहङ्कारः**
**पञ्चतन्मात्राणि चेत्यष्टौ प्रकृतयः।**
**शेषाः षोडश विकाराः।। ( सु.शा. 1/6 )**

आचार्य सुश्रुत तो सांख्यों का अनुकरण करके पञ्चविंशतितत्त्वात्मक ही पुरुष होता है, ऐसा स्वीकार करते हैं। यथा -

अव्यक्त, महान्, अहङ्कार और पञ्चतन्मात्रा ये आठ प्रकृतियाँ हैं। शेष सोलह विकार हैं।

**एषः चतुर्विंशतितत्त्वात्मकः वर्गः अचेतन एव भवति। पुरुषः पञ्चविंशतितमः कार्यकारणसंयुक्तश्चेतयिता भवति। चेतनहेतुः पुरुषस्त्वत्र ''आत्मस्वरूपकः'' वर्तते। सांख्या अपि प्रकृतिपुरुषयोः गणनां भिन्नतत्त्वात्मकस्वरूपेण कुर्वन्ति। किन्तु चरकाचार्यस्तु अव्यक्तसंज्ञिते तत्त्वे प्रकृतेः पुरुषस्य संयुक्तमेव स्वरूपं स्वीकरोति। स तु प्रकृतिव्यतिरिक्तं चोदासीनं पुरुषव्यक्तत्वसाधर्म्यादव्यक्तायां प्रकृतावेव प्रक्षिप्य अव्यक्तशब्देनैव गृह्णाति। तेन चतुर्विंशतिकः पुरुषः पञ्चविंशतितत्त्वमयश्च पुरुषः यः कथितः स त्वविरुद्धः।**

यह चतुर्विंशतितत्त्वात्मक वर्ग अचेतन ही है। पञ्चविंशतितम पुरुष कार्यकरण से संयुक्त होता है। चेतनहेतु पुरुष तो यहाँ ''आत्मस्वरूपक'' है। सांख्य भी प्रकृति और पुरुष का संयुक्त स्वरूप ही स्वीकृत करते हैं। वे तो प्रकृतिव्यतिरिक्त उदासीन पुरुष को अव्यक्तः व के साधर्म्य के कारण अव्यक्त प्रकृति में ही प्रक्षिप्त कर अव्यक्त शब्द से ही ग्रहण करते हैं। इससे (अव्यक्त प्रकृति में ही पुरुष की गणना कर लेने से) चतुर्विंशति तत्त्वों वाला पुरुष और पञ्चविंशतितत्त्वमय पुरुष जो कहा है वह अविरुद्ध है (दोनों में एक ही बात है)।

**चतुर्विंशतितत्त्वात्मकेऽस्मिन् शरीरे चेतनावान् आत्मा निष्क्रियः भवति किन्तु अचेतनं मनः**

**क्रियावद् भवति। आत्मनः सान्निध्येन मन एव सर्वं क्रियाव्यापारं सम्पादयति। प्रसङ्गेऽस्मिन्नाचार्यः कथयति यत्-**

**अचेतनं क्रियावच्च मनश्चेतयिता परः।**
**युक्तस्य मनसा तस्य निर्दिश्यन्ते विभोः क्रियाः।।**
**चेतनावान् यतश्चात्मा ततः कर्ता निरुच्यते।**
**अचेतनत्वाच्च मनः क्रियावदपि नोच्यते।।**
**(च.शा. 1/75-76)**

चतुर्विंशतितत्त्वात्मक इस शरीर में चेतनावान् आत्मा निष्क्रिय होता है किन्तु अचेतन मन क्रियावान् होता है। आत्मा के सान्निध्य से मन ही समस्त क्रियाव्यापार को सम्पादित करता है। इस प्रसङ्ग में आचार्य कहते हैं कि-

मन अचेतन और क्रियावान् होता है और पर आत्मा चेतना प्रदान करने वाला है, मन से युक्त उस विभु की क्रियायें कही जाती हैं अतः सभी क्रियाओं का कर्ता आत्मा को ही माना जाता है क्योंकि आत्मा चेतनावान् होता है इसीलिए वह कर्ता कहा जाता है, मन क्रिया करने वाला होने पर भी अचेतन होने से कर्ता नहीं कहा जाता है।

**अत्र व्याख्याकारश्चक्रपाणिः स्पष्टयति यत्-**

**चेतयिता पर इति पर आत्माका चेतयिता परं न तु साक्षात् क्रियावान्। ननु, यद्येवं कथं तस्य क्रियेत्याह- युक्तस्येत्यादि। आत्माधिष्ठितस्यैव नसः क्रिया उपचारादात्मनः क्रियेत्युच्यत इत्यर्थः। एतदेवोपपादयति चेतनावानित्यादि। चेतनेन ह्यात्मनाऽधिष्ठितं मनः क्रियासु प्रवर्तते, चेतना-नधिष्ठितं तु मनः क्रियासु न प्रवर्ततेः, तेन यत्कृता सा क्रिया स एव क्रियावानिति व्यपदेष्टुं युज्यते, नत्वचेतनं मनः, तत् पराधीनक्रियत्वेन परमार्थतः क्रियावदपि कर्तृत्वेन नोच्यत इति वाक्यार्थः, नोच्यते इति 'कर्तृ' इति शेषः।। (च.शा. 1/75-76)**

यहाँ व्याख्याकार चक्रपाणि स्पष्ट करते हैं कि 'चेतयिता परः' इसका तात्पर्य है पर (अन्य) आत्मा चेतना प्रदान करने वाला है किन्तु आत्मा साक्षात् क्रिया करने वाला नहीं है (अर्थात् आत्मा निष्क्रिय है)। यदि ऐसा है तो उस (निष्क्रिय आत्मा) की क्रिया कैसे होगी, इस को बताते हैं.... युक्तस्येत्यादि। आत्माधिष्ठित (आत्मा जिसका अधिष्ठाता है, प्रधान है ऐसे) मन की क्रिया उपचार से आत्मा की क्रिया कही जाती है, यह अर्थ है। यही बताते हैं (इसी के औचित्य का प्रतिपादन करते हैं)- चेतनावानित्यादि। निःसन्देह चेतन आत्मा से अधिष्ठित मन क्रियाओं में प्रवृत्त होता है (क्रिया प्रारम्भ करता है), चेतना से अनधिष्ठित मन तो क्रियाओं में प्रवृत्त नहीं होता है, अर्थात् कोई क्रिया प्रारम्भ नहीं करता है। उसके द्वारा की गई है वह क्रिया है, वह ही क्रियावान् है, यह कहना विशेष उपयुक्त होता है, न कि अचेतन मनः, उस के पराधीन क्रिया वाला होने से वह वास्तव में क्रियायुक्त भी कर्ता के रूप में नहीं कहा जाता, यह वाक्यार्थ है, "नोच्यते" इस पद के साथ 'कर्तृ' यह पद शेष (अध्याहार्य) है।। (च.शा. 1/75-76 चक्रपाणिः)

**मनसः माध्यमेन सेन्द्रियः देहः अनुभूयते। आचार्यश्चरकः निर्दिशति यत्-**

**वेदनानामधिष्ठानं मनो देहश्च सेन्द्रियः।**
**केशलोमनखाग्रान्नमलद्रवगुणैर्विना।।**
**(च.शा. 1/136)**

मन के माध्यम से सेन्द्रिय देह वेदनाओं की अनुभूति करता है। आचार्य चरक निर्देश करते हैं कि केश,लोम, नखों के अग्रभाग, पुरीष, मूत्र वे स्वेद के विना (अर्थात् इनमें वेदनाओं की अनुभूति नहीं होती, अतः इनके विना) इन्द्रियों से युक्त शरीर और मन वेदनाओं का अधिष्ठन है।

**अत्र स्पष्टरूपेण संङ्केतितं यत् मन एव आत्मनः सान्निध्येन सर्वेषां सुखदुःखानां मूलहेतुः वर्तते। अतएव तस्य निग्रहणं परमावश्यकं वर्तते। मनसः निग्रहणं तु योगमाध्यमेनैव भवति। यतोहि-**

**''योगश्चित्तवृत्तिनिरोधः'' इति संस्वीकृतः। स योगस्तु अष्टाङ्गस्वरूपेण मनसः नियमनं करोति। अष्टाङ्गयोगस्तु निम्नस्वरूपात्मको वर्तते। यथा-**

**यम-नियम-आसन-प्राणायाम-प्रत्याहार-धारणा-ध्यान-समाधयः इति।**

यहाँ स्पष्टरूप से संङ्केतित है कि मन की आत्मा के सान्निध्य से सभी सुख-दुःखों का मूल कारण है। इसलिए ही उसका निग्रहण परमावश्यक है। मन का निग्रहण तो योग के माध्यम से ही होता है। क्योंकि- ''चित्तवृत्ति का निरोध ही योग है'' यह स्वीकृत है। वह योग तो अष्टाङ्गस्वरूप से मन का नियमन करता है। अष्टाङ्गयोग तो निम्न स्वरूपात्मक है। यथा-

यम-नियम-आसन-प्राणायाम-प्रत्याहार-धारणा-ध्यान-समाधि।

**सामान्यतया जनाः आसनानि कृत्वैव ''योगः सञ्जातः'' इत्यामनन्ति। किन्तु नैषः योगः मनसः नियमने समर्थो वर्तते। आसनैस्तु शारीरस्य सामर्थ्यमवाप्यते। किन्तु यावदवशिष्टैः यमादि-सप्ताङ्गैः समुचितः योगः न क्रियते तावन्मनसः चित्तवृत्तिनिरोधात्मकं नियमनं न भवति। अतएव योगासनाभ्यासस्तु श्रेष्ठो वर्तते किन्तु सहैव यमादीनामप्यभ्यासः परमावश्यको वर्तते। एतादृश एव योगः मोक्षप्रवर्तको वर्तते। आचार्यश्चरकः सङ्केतयति यत्-**

**योगे मोक्षे च सर्वासां वेदनानामवर्तनम्।**
**मोक्षे निवृत्तिर्निःशेषा योगो मोक्षप्रवर्तकः।।**

**( च. शा. 1/137 )**

सामान्यतया लोग आसन करके ही योग हो गया, यह मान लेते हैं। किन्तु यह योग मन के नियम में समर्थ नहीं हैं। आसनों से तो शारीरिक सामर्थ्य प्राप्त की जाती है। किन्तु जब तक शेष यमादि सात अङ्गों से समुचित योग नहीं किया जाता तब तक मन की चित्तवृत्ति का निरोधात्मक नियमन नहीं होता है। इसलिए योगासनाभ्यास तो श्रेष्ठ हैं किन्तु इसके साथ ही यम आदि का भी अभ्यास परमावश्यक है। ऐसा ही योग मोक्षप्रवर्तक है। आचार्य चरक सङ्केत करते हैं कि-

योग और मोक्ष में सभी वेदनाओं का अवर्तन (न होना) होता है, मोक्ष होने पर वेदनाओं की समूल निवृत्ति हो जाती है, योग मोक्ष का प्रवर्तक है।

**वस्तुतः मोक्षस्त्वात्यन्तिकरूपेण शरीराद्युच्छेदो वर्तते। प्रारम्भे यो हि चतुर्विंशतितत्त्वात्मकः संयोगस्वरूपः पुरुषो वर्तते। तस्य संयोगस्य वियोग उच्छेदो या मोक्ष इति वर्तते। अत्राप्याचार्यः स्पष्टयति यद् योगमाध्यमेन नियन्त्रिते मनसि शुद्धसत्त्वस्य समाधानं (नीरजस्तमसः मनसः आत्मनि सम्यगाधानं) भवति तदा सर्वसंयोगैः वियोगो भवति, अपुनर्भवापरपर्यायस्य मोक्षस्य स्वरूप एव चैषः वियोगः। यथाहि-**

**मोक्षो रजस्तमोऽभावात् बलवत्कर्मसङ्क्षयात्।**
**वियोगः सर्वसंयोगैरपुनर्भव उच्यते।।**

**( च.शा. 1/142 )**

**अतएव सम्यक्सम्पादित एव योगः वियोग-कारको भवति।**

वस्तुतः मोक्ष तो आत्यन्तिक रूप से शारीरादि का उच्छेद (उखाड देना, समाप्त कर देना) है। प्रारम्भ में जो चतुर्विंश शक्तितत्त्वात्मक संयोगस्वरूप पुरुष है, उसके संयोग का वियोग का उच्छेद मोक्ष है। यहाँ भी आचार्य स्पष्ट करते हैं कि योग के माध्यम से नियन्त्रित मन में शुद्धसत्त्व का समाधान (रजस् और तम रहित मन का आत्मा में सम्यक् आधान) होता है तब सर्वसंयोगों से वियोग होता है, अपुनर्भव नामक दूसरे पर्याय वाले मोक्ष का स्वरूप ही यह वियोग है। यथा-

रजोगुण व तमोगुण के अभाव हो जाने से तथा बलवान् कर्मों का क्षय हो जाने से, सम्पूर्ण सम्बन्धों से वियोग होने पर मोक्ष होता है यह अपुनर्भव है।

इसलिए भलीभांति सम्पादित योग ही वियोगकारक होता है।

**80, सेनापति हाउस के पीछे**
**प्रेमनगरम्, झोटवाड़ा, जयपुरम्**

प्रेषण–प्रत्येक माह की ५ तारीख सी.एस.ओ. गांधीनगर, जयपुर
पंजीयन क्रमांक (भारत) आर. एन. आई. ३७५८–५७

डाक पंजीयन
Jaipur City/405/2018-20

हार्दिक शुभकामनाओं सहित :-

# ए इन्फ्रास्ट्रक्चर लिमिटेड

निर्माता

## ए.सी. प्रेशर पाइप्स

तकनीकी रूप से सर्वोत्तम, पेयजल, कृषि, सीवरेज एवम् सेनिटेशन में उपयोगी
तथा धातु निर्मित पाइपों की अपेक्षा सस्ते और टिकाऊ
फाइबर सीमेंट की नालीदार चादरें

## छत्त एक, लाभ अनेक

हमीरगढ़ भीलवाड़ा - 311025 (राजस्थान) दूरभाष: 01482-286106/07
दिल्ली कार्यालय: ए-9, ग्रीन पार्क मैन, नई दिल्ली-110016 दूरभाष:- 011-26850488
जयपुर पाइप कार्यालय : 411, तीसरी मंजिल, शालीमार काम्प्लेक्स, चर्च रोड़, एम.आई.रोड़, जयपुर
फोन: 0141-2369691, 2370566, फैक्स : 0141-4019691
जयपुर चादरें कार्यालय: शोरूम नं. 2, फर्स्ट फ्लोर, नियर रिद्धी-सिद्धी स्वीट्स, लिंक रोड़, गोपालपुरा, जयपुर
फोन : 0141-3206915, फैक्स:- 0141-2763656

## राष्ट्रीय विचारों के लिए पढ़ें

(हिन्दी) साप्ताहिक
पाञ्चजन्य

(English) Weekly
ORGANISER

हमारी विशेषताएं



- राष्ट्रीय दृष्टिकोण
- 7 दशकों से लगातार प्रकाशित
- संसद तथा विधानसभाओं को गुंजायमान करने वाली पत्रिकाएं
- विश्वसनीय, प्रतिष्ठित, दायित्वपूर्ण पत्रकारिता
- हजारों शैक्षिक, व्यावसायिक प्रतिष्ठानों एवं पुस्तकालयों में पहुंच
- ई-पेपर की सुविधा



You can subscribe Panchjanya/Organiser Weeklies online through our Websites: www.panchjanya.com, www.organiser.org

वार्षिक ग्राहक शुल्क

भारत में ₹ 700/- पाञ्चजन्य ● ₹ 800/- ORGANISER (साधारण डाक द्वारा)
विदेशों में $ 80 (विदेशों में हवाई डाक द्वारा)

### प्रसार विभाग
### भारत प्रकाशन (दिल्ली) लिमिटेड

2322, संस्कृति भवन, लक्ष्मी नारायण गली, पहाड़गंज, नई दिल्ली- 110055
फोन : 011-47642000,01,02, ई-मेल: circ@bpdl.in

स्वत्वाधिकारी–भारतीयसंस्कृतप्रचारसंस्थानम्, राजस्थानम् दूरभाषः २३७९०१४ प्रकाशको मुद्रकश्च माणकचन्द माहेश्वरी द्वारा न्यू जय शिवा प्रिन्टर्स, गोपालबाड़ी, जयपुरम् दूरभाषः २३६५७२१ पत्रसंकेतः– भारतीभवनम्, बी–१५ न्यू कॉलोनी, जयपुरम्–३०२ ००१ भारतीयसंस्कृतप्रचार संस्थानस्य अध्यक्षः शंकर प्रसाद शुक्लः

प्रतिष्ठायाम्,